हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरिज़्पुस्तकमालायाः

११

कर्मकाण्डविभागे (१) प्रथमपुष्पम् ।

पारस्करगृह्यसूत्रम् ।

कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन
कल्पसहितम् ।

काशीस्थसुप्रसिद्ध-श्रीधर्माधिकारि-पाठशालायां
प्रधानाध्यापकव्याकरणोपाध्याय-श्रीगोपाल-
शास्त्रिणां साहाय्येन

पण्डित व्याकरणोपाध्याय पुणतामकरोपाह्व
मुकुन्दपन्तेन संशोधितम् ।

तच्च—

वाराणस्याम्
चौखम्बासंस्कृतपुस्तकालयस्वामिना श्रेष्ठिकुलभूषण-
हरिदासगुप्तात्मजेन जयकृष्णदासगुप्तमहो-
दयेन विद्याविलासनाम्नि यन्त्रालये
मुद्रयित्वा प्रकाशितः ।

१९२०

पारस्करगृह्यसूत्रम्

कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-
भोजन-कल्पसहितम् ।

काशीस्थसुप्रसिद्ध-श्रीधर्माधिकारि-
पाठशालायां प्रधानाध्यापक-
व्याकरणोपाध्याय-श्री-
गोपाल शास्त्रिणां
साहाय्येन

—:०:—

पण्डित व्याकरणोपाध्याय पुणतामकरोपाह्व
मुकुन्दपन्तेन संशोधितम् ।

तच्च—

काश्यां विद्याविलासनाम्नि मुद्रणयन्त्रे
श्रीजयकृष्णदास गुप्त महाशयेन मुद्रितं
प्रकाशितं च ।

संवत् १९७७ सन् १९२०

सपरिशिष्टपारस्करगृह्यसूत्रस्य—

विषयाणामनुक्रमणिका।

प्रथमं काण्डम्।

---

* यद्यप्येष्वष्टसु पत्रेष्वङ्का १७ सप्तदशतश्चतुर्विंशति २४ पर्यन्ता एव तथाऽपि ते भ्रमजन्या इति २५ तो ३२ पर्यन्तानुरोधेनैवात्र संनिवेशिताः।

इति सपरिशिष्टपारस्करगृह्यसूत्रस्थविषयाणा-
मनुक्रमणिका ।

श्रीगणेशाय नमः ॥

पारस्करगृह्यसूत्रम् ।

अथातो गृह्यस्थालीपाकानां कर्म । परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरूप्याऽऽज्यमधिश्रित्य पर्यग्निकुर्यात् । स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात् । आज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयात् । एष एव विधिर्यत्र क्वचिद्धोमः ॥ १ ॥

आवसथ्याधानं दारकाले, दायाद्यकाल एकेषाम् । वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुष्प्राश्यपचनवत्सर्वम् । अरणिप्रदानमेके;पञ्च महायज्ञा इति श्रुतेः । अग्न्याधेयदेवताभ्यः स्थालीपाकꣳश्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति–'त्वन्नो अग्ने' 'सत्वन्नो अग्ने' 'इमं मेवरुण' 'तत्वायामि' 'येतेशतम्' 'अयाश्चाग्ने' 'उदुत्तमं' 'भवतन्न'इत्यष्टौ पुरस्तात् । एवमुपरिष्टात्स्थालीपाकस्याग्न्याधेयदेवताभ्यो हुत्वा जुहोति, स्विष्टकृते च । 'अ

यास्यग्नेवषट्कृतं' 'यत्कर्मणात्यरीरिचं' 'देवा गातु विदः' इति । बर्हिर्हुत्वा प्राश्नाति । ततोब्राह्मणभोजनम् ॥ २ ॥

षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति । प्रतिसंवत्सरानर्हयेयुः । यक्ष्यमाणास्त्वृत्विजः । आसनमाहार्याऽऽह साधु भवानास्तामर्चयिष्यामो भवन्तमिति आहरन्ति विष्टरं पाद्यं=पादार्थमुदकमर्घमाचमनीयं मधुपर्कं दधि मधु घृतमपिहितं काᳪस्ये काᳪस्येन। अन्यास्त्रिस्त्रिः प्राह विष्टरादीनि विष्टरं प्रतिगृह्णाति । 'वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमं तमभितिष्ठामि योमा कश्चाभिदासति'इत्येनमभ्युपविशति । पादयोरन्यं विष्टरआसीनाय । सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति, ब्राह्मणश्चेद्दक्षिणं प्रथमम्,— 'विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह' इति । अर्घं प्रतिगृह्णाति 'आपःस्थ युष्माभिः सर्वान्कामानवाप्नवानि'इति । निनयन्नभिमन्त्रयते-'समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टास्माकं वीरा मापरासेचि मत्पयः'इति । आचामति-'आमागन्यशसा सᳪसृज वर्चसा ॥ तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्'इति । 'मित्रस्य त्वा'इति मधुपर्कं प्रतीक्षते । 'देवस्यत्वा'इति प्रतिगृह्णाति । सव्ये पाणौ कृत्वा दक्षिणस्या-

ऽनामिकया त्रिः प्रयौति—'नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि' इति । अनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति । तस्य त्रिः प्राश्नाति—'यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यम् । तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि' इति । मधुमतीभिर्वा प्रत्यृचम् । पुत्रायान्तेवासिने वोत्तरत आसीनायोच्छिष्टं दद्यात्, सर्वं वा प्राश्नीयात् । प्राग्वाऽसंचरे निनयेत् । आचम्य प्राणान्संमृशति—'वाङ्‌ म आस्ये नसोः प्राणोऽक्ष्णोश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वोरोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह' इति । 'आचान्तोदकाय शासमादाय गौरिति त्रिः प्राह प्रत्याह—'माता रुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥ मम चामुष्य च पाप्मानꣳ हनोमि' इति यद्यालभेत । अथ यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हतॐ मुत्सृजत तृणान्यत्त्विति ब्रूयात् । नत्वेवामाꣳसोऽर्घः स्यात् । अधियज्ञमधिविवाहं कुरुतेत्येव ब्रूयात् । यद्यप्यसकृत्संवत्सरस्य सोमेन यजेत कृतार्घ्या एवैनं याजयेयुर्नाकृतार्घ्या इति श्रुतेः ॥ ३ ॥

चत्वारः पाकयज्ञा हुतो ऽहुतः प्रहुतः प्राशित-

इति । पञ्चसु बहिः शालायां विवाहे चूडाकरण उपनयने केशान्ते सीमन्तोन्नयन इति । उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय । निर्मन्थ्यमेके विवाहे । उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात् । त्रिषु त्रिषूत्तरादिषु स्वातौ मृगशिरसि रोहिण्यां वा । तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण । द्वे राजन्यस्य । एका वैश्यस्य । सर्वेषाꣳशूद्रामप्येके मन्त्रवर्जम् । अथैनां वासः परिधापयति—'जराङ्गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा । शतञ्च जीव शरदः सुवर्चा रयिञ्च पुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्व वासः' इति । अथोत्तरीयम्—'या अकृन्तन्न वयं या अतन्वत ॥ याश्च देवीस्तन्तूनभितो ततन्थ । तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः' इति । अथैनौ समञ्जयति—"समञ्जतु विश्वेदेवाः समापो हृदयानि नौ ॥ सम्मातरिश्वासंधातासमुदेष्ट्री दधातु नौ" इति । पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति—'यदैषि मनसा दूरं दिशोऽनुपवमानो वा । हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्विति असौ' इति । अथैनौ समीक्षयति—'अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शञ्चतुष्पदे ॥ सोमः प्रथमो

विविदे गन्धर्वो विविद उत्तरः ॥ तृतीयोऽग्निष्टे पति-स्तुरीयस्ते मनुष्यजाः ॥ सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये ॥ रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥ सा नः पूषा शिवतमामैरय सा न ऊरू उशती विहर ॥ यस्यामुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्ट्या' इति ॥ ४ ॥

प्रदक्षिणमग्निं पर्याणीयैके। पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रवृत्योपविशति । अन्वारब्ध आघारावाज्य-भागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्च । एतन्नित्यꣳ सर्वत्र । प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चे-दाज्याद्धविः । सर्वप्रायश्चित्तं प्राजापत्यान्तरमेतदावाप-स्थानं विवाहे । राष्ट्रभृतइच्छञ्जयाभ्यातानाँश्च जानन् । येन कर्मणेर्त्सेदिति वचनात् । 'चित्तं च चित्तिश्चाकूतं चा-कूतिश्च विज्ञातं च विज्ञातिश्च मनश्च शक्करीश्च दर्शश्च पौर्णमासं च बृहच्च रथन्तरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु ॥ तस्मै विशः समन-मन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा' इति । 'अग्निर्भूतानामधिपतिः स माऽवत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोपाꣳ समुद्रः स्रो-

त्यानामन्न्ँ साम्राज्यानामधिपति तन्माऽवतु. सोम ओषधीनाँ सविता प्रसवानाँ रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परे वरे ततास्ततामहाः ॥ इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रे ऽस्यामाशिष्यस्या पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याँ स्वाहा' इति सर्वत्रानुषजति । आग्निरैतु प्रथमो देवतानाँ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ॥ तदयँ राजा वरुणोऽनुमन्यतां यथेयँ स्त्री पौत्रमघन्नरोदात्स्वाहा ॥ इमामग्निस्त्रायताङ्गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ॥ अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुध्यतामियँ स्वाहा ॥ स्वस्तिनो अग्ने दिवआ पृथिव्या विश्वानिधेह्ययथा यजत्र ॥ यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रँ स्वाहा ॥ सु गन्नुपन्थाम्प्रदिशन्नऽ एहि ज्योतिष्मध्ये ह्यजरन्नऽ आयुः ॥ अपैतु मृत्यु रमृतन्न आगाद्वैवस्वतो नो ऽअभयं कृणोतु स्वाहेति । परं मृत्यविति चैके प्राशनान्ते ॥ ५ ॥

कुमार्या भ्राता शमीपलाशमिश्राँल्लाजानञ्जलिनाञ्जलावावपति । तां जुहोति सँहतेन तिष्ठत्यर्यमणं देवं कन्याऽ अग्निमयक्षत ॥ स नो अर्यमा देवः प्रेतो मुञ्चतु

मा पतेः स्वाहा ॥ इयन्नार्युपब्रूते लाजानावपन्तिका—"आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥ इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव ॥ मम तुभ्य च संवननं तदग्निरनुमन्यतामियꣳ स्वाहा" इति। अथास्यै दक्षिणꣳ हस्तं गृह्णाति साङ्गुष्ठं—'गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः॥ भगोऽअर्यमा सविता पुरन्धिर्मह्यं त्वा ऽदुर्गार्हपत्याय देवाः ॥ अमोहमस्मि सा त्वꣳ सा त्वमस्यमोऽअहम् ॥ सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वम्॥ तावेहि विवहावहै सह रेतो दधावहै ॥ प्रजां प्रजनयावहै पुत्रान्विन्द्यावहै बहून् । ते सन्तु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शतꣳ श्रृणुयाम शरदः शतम्'इति ॥ ६ ॥

अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेन'—आरोहेममश्मानमश्मेव त्वꣳ स्थिरा भव॥ अभितिष्ठ पृतन्यतोऽवबाधस्व पृतनायत'इति। अथ गाथां गायति—'सरस्वति प्रेदमव सुभगे वाजिनीवति ॥ यां त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः॥ यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत् ॥ तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः' इति । अथ परिक्रामतः—'तुभ्यमग्ने पर्यवहन्सूर्यां वहतु

नासह ॥ पुनः पतिभ्यो जायां दाग्ने प्रजया सह' इति । एवं द्विरपरं लाजादि । चतुर्थꣳ शूर्पकुष्ठया सर्वाँल्लाजानावपति भगाय स्वाहेति । त्रिः परिणीतां प्राजापत्यꣳ हुत्वा ॥ ७ ॥

अथैनमुदीचीꣳ सप्तपदानि प्रक्रामयति—'एकमिषे द्वेऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव । विष्णुस्त्वानयतु' इति सर्वत्रानुषजति । निष्क्रमणप्रभृत्युदकुम्भꣳ स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवति । उत्तरत एकेषाम् ॥

तत एनां मूर्धन्यभिषिञ्चति—'आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्' इति, आपोहिष्ठेति च तिसृभिः । अथैनाꣳ सूर्यमुदीक्षयति—तच्चक्षुरिति । अथास्यै दक्षिणाꣳसमधिहृदयमालभते—'मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु ॥ मम वाचमेकमनाजुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्' इति । अथैनामभिमन्त्रयते—'सुमङ्गलीरियं वधूरिमाꣳ समेत पश्यत ॥ सौभाग्यमस्यै दत्त्वायाथाऽस्तं विपरेतन' इति । तां दृढपुरुष उन्मथ्य प्राग्वोदग्वानुगुप्तागार आनडुहे रोहिते चर्मण्युपवेशयति—'इह गावो निषीदन्त्विहाश्वा इह पूरुषाः ॥

इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदन्त्विति । ग्रामवचनं च कुर्युर्विवाहश्मशानयोर्ग्रामं प्रविशतादिति वचनात् । तस्मात्तयोर्ग्रामप्रमाणमिति श्रुतेः । आचार्याय वरं ददाति । गौर्ब्राह्मणस्य वरः । ग्रामो राजन्यस्य । अश्वो वैश्यस्य । अधिरथꣳ शतं दुहितृमते । अस्तमिते ध्रुवं दर्शयति 'ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पो(१)ष्ये मयि मह्यं त्वादात् ॥ बृहस्पतिर्म(२)या पत्या प्रजावती सञ्जीव शरदः शतम्'इति । सा यदि न पश्येत्पश्यामीत्येवं ब्रूयात् । त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शयीयाताꣳ संवत्सरन्न मिथुनमुपेयातां द्वादशरात्रꣳ षड्रात्रं त्रिरात्रमन्ततः ॥ ८ ॥

उपयमनप्रभृत्यौपासनस्य परिचरणम् । अस्तमितानुदितयोर्दध्ना तण्डुलैरक्षतैर्वा 'अग्नये स्वाहा, प्रजापतये स्वाहा'इति सायम् । 'सूर्याय स्वाहा, प्रजापतये स्वाहा'इति प्रातः । पुमाꣳसौ मित्रावरुणौ पुमाꣳसावश्विनावुभौ ॥ पुमानिन्द्रश्च सूर्यश्च पुमाꣳ संवर्ततां मयि पुनः स्वाहेति पूर्वां गर्भकामा ॥ ९ ॥

राज्ञोऽक्षभेदे नद्धविमोक्षे यानविपर्यासेऽन्यस्यां वा व्यापत्तौ स्त्रियाश्चोद्वहने तमेवाग्निमुपसमाधायाज्यꣳ

---

(१)ष्याइतिभाष्ये. (२)तिः । अत्रावसानंभाष्ये.

संस्कृत्येह रतिरिति जुहोति नानामन्त्राभ्याम् । अन्यद्यानमुपकल्प्य तत्रोपवेशयेद्राजानं स्त्रियं वा प्रतिक्षत्र इति यज्ञान्तेनात्वाहार्षमिति चैतया । धुर्यौ दक्षिणा । प्रायश्चित्तिः । ततो ब्राह्मणभोजनम् ॥ १० ॥

चतुर्थ्यामपररात्रे ऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति । अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा ॥ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति । स्थालीपाकस्य जुहोति प्रजापतये स्वाहेति । हुत्वा हुत्वैतासामाहुतीनामुदपात्रे संस्रवान्समवनीय

तत एनां मूर्द्धन्यभिषिञ्चति—"या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्यत्वं मया सहासौ"इति। अथैनाꣳ स्थालीपाकं प्राशयति—"प्राणैस्ते प्राणान्संदधाम्यस्थिभिरस्थीनि माꣳसैर्माꣳसानि त्वचा त्वचम्"इति। तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति। तामुदुह्य यर्थतुप्रवेशनम्। यथाकामी वा "काममाविजनितोः सम्भवाम"इति वचनात्। अथास्यै दक्षिणाꣳसमधिहृदयमालभते—"यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्॥ वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्"इति। एवमत ऊर्ध्वम्॥ ११॥

पक्षादिषु स्थालीपाकꣳ श्रपयित्वा दर्शपूर्णमासदेवताभ्यो हुत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति। विश्वेभ्यो देवेभ्यो बलिहरणं भूतगृह्येभ्य आकाशाय च। वैश्वदेवस्याग्नौ जुहोति-'अग्नये स्वाहा, प्रजापतये स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा,ऽग्नये स्विष्टकृते स्वाहा'इति। प्राशनान्ते बाह्यतः स्त्रीबलिꣳ हरति—'नमः स्त्रियै नमः पुꣳसे वयसेऽवयसे नमः शुक्लाय कृष्णदन्ताय पापीनां पतये नमो ये मे प्रजामुप-

लीभयन्ति ग्रामे वसन्त उत वारण्ये तेभ्यो नमोऽस्तु बलिमेभ्यो हरामि स्वस्ति मेऽस्तु प्रजां मे ददतु' इति । शेषमद्भिः प्रप्लाव्य ततो ब्राह्मणभोजनम् ॥ १२ ॥

अथर्तुमतीं जायामधिगच्छेत्पिण्डपितृयज्ञेन यजेत मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा, तत एतामाहुतिं जुहोति । आधत्त पितर इत्यलंकारमत्रजिघ्रति । आयन्तुन इति जपति । एवमथर्त्तुमतीजायाहृदयमालभ्य पूर्ववत्सव्येन पाणिनोपस्थमाभिमृशति भग प्रणेतरिति प्रागुतेदानीमिति रेतोमूत्रमिति संधत्ते गायत्रेणेति प्रतिमन्त्रं मन्थयति पुत्रकामोऽभिगच्छेन्नित्यम् ॥ १३ ॥

अथ गर्भाधानꣳ स्त्रियाः पुष्पवत्याश्चतुरहादूर्ध्वꣳ स्नात्वा विरजायास्तस्मिन्नेव दिवा "आदित्यं गर्भम्"इत्यादित्यमत्रे(१)क्षते गृहे वा स्नापयित्वा तामभिगच्छेदिति श्रुतेस्तस्मिन्प्रजायाः सम्भवकाले निशायां कुर्याद्यदि दिवा मैथुनं व्रजेत्क्लीबा अल्पवीर्या अल्पायुषाश्च प्रसूयन्ते तस्मादेतद्वर्जयेत्प्रजाकामो हि श्रुतिस्मृतिविरोधाभ्यां, दक्षिणेन पाणिना ऊरू प्रसार्य प्रजास्थानमभिमृशति पूषा भगꣳ सविता मे ददातु रुद्रः कल्पयति ललामꣳविष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु ॥

(१) घेक्षत इति पाठः ॥

आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ॥ गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजाविति । सꣳसृजेथास्तेजो वैश्वानरो दद्याद्ब्राह्मणमामन्त्रयते ब्रह्मा गर्भं दधात्विति । प्राङ्मुख उदङ्मुखो वोपविष्टो मन्थद्रतोमूत्रमिति चैके स्रावणं कुर्यात् ॥ १४ ॥

सा यदि गर्भं न दधीत सिꣳह्या श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चति—'इयमोषधी त्रायमाणा सहमाना सरस्वती । अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभम्' इति ॥ १५ ॥

अथ पुꣳसवनम् । पुरा स्यन्दतइति मासे द्वितीये तृतीये वा । यदहः पुꣳसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याप्लाव्याऽहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गांश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनꣳ हिरण्यगर्भोऽद्भ्यः संभृत इत्येताभ्याम् । कुशकण्टकꣳ सोमाꣳशुं चैके । कूर्मपित्तं चोपस्थे कृत्वा स यदि कामयेत वीर्यवान्स्यादिति विक्रम्यैनमभिमन्त्रयते सुपर्णोऽसीति प्राग्विष्णुक्रमेभ्यः ॥ १६ ॥

अथ सीमन्तोन्नयनम् ॥ पुꣳसवनवत्प्रथमगर्भे

मासे षष्ठेऽष्टमे वा। तिलमुद्गमिश्रं स्थालीपाकं श्रपयित्वा प्रजापतेर्हुत्वा पश्चादग्नेर्भद्रपीठ उपविष्टायां युग्मेन सटालुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जूलैस्त्रेण्या शलल्या वीरतरशङ्कुना पूर्णपात्रेण च सीमन्तमूर्ध्वं विनयति भूर्भुवःस्वरिति, प्रति महाव्याहृतिभिर्वा । त्रिवृतमाबध्नाति—"अयमूर्जावतो वृक्ष उर्जीव फलिनी भव" इति । अथाह वीणागाथिनौ राजानंसंगायेतां यो वाप्यन्यो वीरतर इति । नियुक्तामप्येके गाथामुपोदाहरन्ति । सोम एव नो राजेमा मानुषीः प्रजाः ॥ अविमुक्त चक्र आसीरंस्तीरे तुभ्यमसाविति यां नदीमुपावसिता भवति तस्या नाम गृह्णाति । ततो ब्राह्मणभोजनम् ॥ १७ ॥

सोष्यन्तीमद्भिरभ्युक्षति । एजतु दशमास्य इति प्रागयस्यैत इति । अथावरावपतनम् । अवैतु पृश्निशैवलं शुने जरायवत्तवे । नैव मांसेन पीवरीं न कस्मिंश्च नायतनमवजरायुपद्यतामिति । जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति । अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधामि भुवस्त्वयि दधामि स्वस्त्वयि दधामि भूर्भुवः स्वः सर्वं त्वयि दधामी-

ति। अथास्यायुष्यं करोति। नाभ्यां दक्षिणे वा कर्णे जप- ति। अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तेन त्वाऽऽयुषा युष्मन्तं करोमि। सोम आयुष्मान्स ओषधीभिरायुष्मां- स्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। ब्रह्मायुष्मत्तद्ब्राह्मणै- रायुष्मत्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। देवा आयुष्म- न्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्म- न्तं करोमि। पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। यज्ञ आयुष्मान्स दक्षिणाभि- रायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि। समुद्र आयु- ष्मान्त्स स्रवन्तीभिरायुष्मांस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करो- मीति। त्रिस्त्रिस्त्र्यायुषमिति च। स यदि कामयेत सर्वमायु- रियादिति वात्सप्रेणैनमभिमृशेत्। दिवस्परीत्येतस्यानुवाक- स्योत्तमामृचं परिशिनष्टि। प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति। पूर्वो ब्रूयात्प्राणेति। व्यानेति- दक्षिणः। अपानेत्यपरः। उदानेत्युत्तरः। समानेति प- ञ्चम उपरिष्टादवेक्षमाणो ब्रूयात्। स्वयं वा कुर्यादनुपरि- क्राममविद्यमानेषु। स यस्मिन्देशे जातो भवति तमभिम- न्त्रयते वेद ते भूमिहृदयं दिवि चन्द्रमसि श्रितम्॥ वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं जीवेम शरदः

शतꣳश्रृणुयाम शरदः शतमिति । अथैनमभिमृशत्यश्मा भव परशुर्भव हिरण्यमस्रुतं भव ॥ आत्मा वै पुत्रनामासि स जीव शरद: शतमिति । अथास्य मातरमभिमन्त्रयत इडासि मैत्रावरुणी वीरे वीरमजीजनथा: ॥ सा त्वं वीरवती भव यास्मान्वीरवतोऽकरदिति । अथास्य दक्षिणꣳस्तनं प्रक्षाल्य प्रयच्छतीमꣳ स्तनमिति यस्ते स्तन इत्युत्तरमेताभ्याम् । उदपात्रꣳ शिरस्तो निदधात्यापो देवेषु जाग्रथ यथा देवेषु जाग्रथ ॥ एवमस्याꣳ सूतिकायाꣳसपुत्रिकायां जाग्रथेति । द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्सन्धिवेलयो: फलीकरणमिश्रान् सर्षपानग्नावावपति-"शण्डामर्का उपवीरः शौण्डिकेय उलूखलः ॥ मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा ॥ आलिखन्ननिमिषः किं वदन्त उपश्रुतिर्हर्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा" इति । यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताङ्क आधाय जपति-"कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम ॥ यत्ते देवा वरमददुः स त्वं कुमारमेव वा वृणीथाः ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर तत्सत्यम् ॥ यत्ते सरमा माता सीसरः पिता श्या-

सशबलौ भ्रातरौ ॥ चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेतापह्वर''इति । अभिमृशति—''न नामयति न रुदति न हृष्यति न ग्लायति यत्र वयं वदामो यत्र चाभिमृशामसि''इति ॥ १८ ॥

''अथातो यमलजनने प्रायश्चित्तं व्याख्यास्यामः। यस्य भार्या गौर्दासी महिषी वडवा वा विकृतं प्रसवेत् प्रायश्चित्ती भवेत्पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां काषायमुपसंहरेत् प्लक्षवटौदुम्बराश्वत्थशमीदेवदारुगौरसर्षपास्तेषामयोहिरण्यदूर्वाङ्कुराम्रपल्लवैरष्टौ कलशान्प्रपूर्य सर्वौषधीनां च दम्पती स्नापयित्वा''आपोहिष्ठा''इति तिसृभिः ''कया नश्चित्र''इति द्वाभ्यां पञ्चैन्द्रेण पञ्चवारुणेन ''इदमापःप्रवहते''इति''अपाघम्''इति स्नापयित्वाऽलंकृत्य तौ दर्भेषूपवेश्य तत्र मारुतं स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति पूर्वोक्तैः स्नपनमन्त्रैः स्थालीपाकस्य जुहोति—अग्नये स्वाहा, सोमाय स्वाहा, पवमानाय स्वाहा, पावकाय स्वाहा, मरुताय स्वाहा, मारुताय स्वाहा' मरुद्भ्यः स्वाहा, यमाय स्वाहा, अन्तकाय स्वाहा, मृत्यवे स्वाहा, ब्रह्मणे स्वाहा, अग्नये स्विष्टकृते स्वाहा' इति । एतदेव गृहोत्पातेषूलूककपोतगृध्रः श्येनो वा गृहं प्रविशेत्स्तम्भः प्ररोहेद्वल्मीकं मधुजालं वा

भवेदुदकुम्भप्रज्वलनासनशयनयानभङ्गेषु गृहगोधिकाकृकलासशरीरसर्पण इति। एवं छत्रध्वजविनाशे सार्पे नैर्ऋते गण्डयोगेष्वन्येष्वप्युत्पातेषु भूकम्पोल्कापातकाकसर्पसङ्गमप्रेक्षणादिष्वेतदेव प्रायश्चित्तं ग्रहशान्त्युक्तेन विधिना कृत्वाचार्याय वरं दत्त्वा ब्राह्मणान् भोजयित्वा स्वस्तिवाच्याशिषः प्रतिगृह्य शान्तिर्भवति शान्तिर्भवति ॥ १९॥

अथ यमलचरुं मारुतं व्याख्यास्यामः। यस्य च यमलौ पुत्रौ दारिका वा प्रजायेत। पूर्णे दशाहे चतुर्णां क्षीरवृक्षाणां काषायमाहृत्याश्वत्थप्लक्षन्यग्रोधौदुम्बराश्चत्वारोऽविधवाः स्नापयन्ति। ब्रह्मचारिणो वा शुक्लवाससऐन्द्रीं दिशमुदीचीं वा मङ्गलं पूर्ववद्गायन्त्यो यमालिनीं स्नापयन्त्याचार्यः स्नापयति। वसोः पवित्रेण शतधारेण चाष्टभिः कलशैः स्नात्वा प्रतिरथं जपेत्—"इदमापः प्रवहत" इति। तौ स्नापितौ वरं प्रयच्छत्यानडुहमातृभ्यश्च हिरण्यं वस्त्रमेवपरीतोषणम्। "वाजे वाजे वत" इति जपत्याघारं मारुतं चरुं जुहोति—मरुताय स्वाहा, मारुताय स्वाहा, मरुद्भ्यो विष्णवे प्रजापतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृते स्वाहा इति। प्राशनान्ते शेषं चरुं गृहीत्वाऽश्वत्थं प्रदक्षिणीकृत्योपविशत्तदेव तन्त्रꣳ समाप्य ततो ब्राह्मणभोजनम् ॥ २० ॥

अथातो मूलविधिं व्याख्यास्यामः । मूलांशे प्रथमे पितुर्नेष्टो द्वितीये मातुस्तृतीये धनधान्यस्य चतुर्थे कुल-शोकावहः स्वयं पुण्यभागी स्यान्मूलनक्षत्रे मूलविधानं कुर्यात्सर्वौषध्या सर्वगन्धैश्च संयुक्तं तत्रोदकुम्भं कृत्वा सवस्त्रगन्धपुष्परत्नसहितं श्वेतसिद्धार्थकुसुमायुक्तं कुर्या-त्तस्मिन् रुद्रं जपित्वा प्रतिरथꣳ राक्षोघ्नं सूक्तं द्वितीयोद-कुम्भं कृत्वा चतुःप्रस्रवणसंयुक्तं तस्मिन्नुपरिष्टान्मूलानि धारयेद्वंशपात्रे कृत्वा वस्त्रे बद्ध्वा तस्मिन्प्रधानानि मूलानि वक्ष्यामि । हिरण्मयमूलꣳ सप्तधान्यानि । प्रथमा काश्मर्या सहदेव्यपराजिता बाला पाठा शङ्खपुष्प्यधोपुष्पी मधु-यष्टिका चक्राङ्किता मयूरशिखा काकजङ्घा कुमारीद्वयं जीवन्त्यपामार्गभृङ्गराजलक्ष्मणा सुलक्ष्मणा जाती व्याघ्रपत्रश्चक्रमर्दकसिद्धेश्वरोऽश्वत्थोदुम्बरपलाशप्लक्षव-टार्कदूर्वारोहितकशमीशतावरीत्येवमादि मूलं पूरयि-त्वा तस्मिन्निषिद्धानि मूलानि वक्ष्यामि । बैल्वधव-निम्बकदम्बराजवृक्षोक्षशालप्रियालुदधिकपित्थकोविदार-श्लेष्मातकबिभीतकशाल्मलिररलुसर्वकण्टकीवर्जम् । तत्राभिषेकं कुर्यात्पितुःशिशोर्जनन्या "देवस्य त्वा" इत्यौ-दुम्बर्यासन्दीमुदगग्रामास्तृणाति । तत्रासीनान्सम्पातैर्नैके-नाभिषिञ्चति । शिरसोऽध्यनुलोमꣳ शिरो मे श्रीर्यश इति

यथालिङ्गमङ्गानि संमृशति । स्नात्वा तदूर्ध्वं नैर्ऋतं पायसꣳ श्रपयित्वा काश्मर्यमयꣳ स्रुक्स्रुवं प्रतप्य संमृज्यान्वारब्ध आघारावाज्यभागौ हुत्वा "सुन्वन्तम्" इति चतस्रः स्थालीपाकेन जुहुयात्पञ्चदशाज्याहुतीश्चतुर्गृहीतेन जुहोति-"कृणुष्वपाज" इति पञ्च "मानस्तोक" इति द्वे "या ते रुद्र शिवा तनूः" इति षट् "अग्नीरक्षाꣳसि सेधति शुक्रज्योतिरमर्त्यः ॥ शुचिः पावक ईड्य" इति "त्वन्नः सोम विश्वतो रक्षाराजन्नघायतो नरिष्ये त्वावतः सखा।" इति स्विष्टकृदादिप्राशनान्ते कृष्णा गौः कृष्णाश्च तिला हेममयमूलꣳ सप्तधान्यसंयुक्तमाचार्याय वरं दद्यात्कृष्णोऽनड्वान्ब्रह्मणे दद्यान्नक्षत्रसूचकेभ्यो वासो दद्यादन्येभ्यो ब्राह्मणेभ्यः सुवर्णं दद्यात्कृसरान्नपायसेन ब्राह्मणान्भोजयेत्मार्पदैवने गण्डजातानामेष एव विधिः कात्यायनेनोक्तः कात्यायनेनोक्तः ॥ २१ ॥

दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम् । अयुजाक्षरमाकारान्तꣳ स्त्रियै तद्धितम् । शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य । चतुर्थे मासि निष्क्रमणिका । सूर्यमुदीक्षयति "तच्चक्षुः" इति ॥ २२ ॥

प्रोष्यैत्य गृहानुपतिष्ठते पूर्ववत् । पुत्रं दृष्ट्वा जपति–"अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतम्"इति । अथास्य मूर्द्धानमवजिघ्रति–"प्रजापतेष्ट्वा हिङ्कारेणावजिघ्रामि सहस्रायुषाऽसौ जीव शरदः शतम्"इति, "गवां त्वा हिङ्कारेण" इति च त्रिर्दक्षिणेऽस्य कर्णे जपति । "अस्मे प्रयन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः ॥ अस्मे शतꣳ शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन्"इति । "इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ॥ पोषꣳ रयीणामरिष्टिं तनूनाꣳ स्वाद्मानं वाचः सुदिनं त्वमह्नाम्" इति सव्ये । स्त्रियै तु मूर्द्धानमेवावजिघ्रति तूष्णीम् ॥ २३ ॥

षष्ठे मासेऽन्नप्राशनम् । स्थालीपाकꣳ श्रपयित्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति–"देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ॥ सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा"इति । "वाजो नो अद्य"इति च । द्वितीयां स्थालीपाकस्य जुहोति–'प्राणेनान्नमशीय स्वाहाऽपानेन गन्धानशीय स्वाहा चक्षुषा रूपाण्यशीय स्वाहा श्रोत्रेण यशोऽशीय स्वाहा'इति । प्रा-

शनान्ते सर्वान्रसान्सर्वमन्नमेकत उद्धृत्याथैनं प्राशयेत् तूष्णीꣳहन्तेति वा । "हन्तकारं मनुष्याः" इति श्रुतेः । भारद्वाज्या माꣳसेन वाक्प्रसारिकामस्य, कपिञ्जलमाꣳसेनान्नाद्यकामस्य, मत्स्यैर्जवनकामस्य, कृकषाया आयुःकामस्य, आट्या ब्रह्मवर्चसकामस्य, सर्वैः सर्वकामस्य अन्नपर्याय वा ततो ब्राह्मणभोजनमन्नपर्याय वा ततो ब्राह्मणभोजनम् ॥ २४ ॥

इति गृह्यसूत्रे प्रथमकाण्डं समाप्तम् ॥ १ ॥

सांवत्सरिकस्य चूडाकरणम् ॥ तृतीये वा प्रतिहते षोडशवर्षस्य केशान्तः । यथामङ्गलं वा सर्वेषाम् । ब्राह्मणान्भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशति । अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्ण आसिञ्चति "उष्णेन वा य उदकेनेह्यदिते केशान्वप" इति "केशश्मश्रु" इति च केशान्ते । अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति । तत आदाय दक्षिणं गोदानमुन्दति 'सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय वर्चसे' इति । त्रेण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधाति ओषध" इति । शिवो नामेति लोहक्षुर-

मादाय निवर्तयामीति प्रवपति—येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ॥ तेन ब्रह्माणो वपते-दमस्यायुष्यं जरदष्टिर्यथा सत्"इति। स केशानि प्राच्छि-द्यानडुहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रीयमाणे । एवं द्विरपरं तूष्णीम् इतरयोश्चोन्दनादि।अथ पश्चात् त्र्यायुष-मिति । अथोत्तरतो येन भूरिश्चरा दिवं ज्योक्च पश्चाद्धि सूर्यम् ॥ तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये" इति त्रिः क्षुरेण शिरः प्रदक्षिणं परिहराति । समुखं केशान्ते "यत्क्षुरेण मज्जयता सुपेश-सा वप्त्वा वा वपति केशांश्छिन्धि शिरो मास्यायुः प्रमो षीः । 'मुखम्'इति च केशान्ते ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छति—"अक्षण्वं परिवप"इति । यथामङ्गलं केशशेषकरणम् । अनुगुप्तमेतᳪसकेशं गोम-यपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वाऽऽचार्याय वरं ददाति गां केशान्ते संवत्सरं ब्रह्मचर्यमवपनं च केशा-न्ते द्वादशरात्रᳪ षड्रात्रं त्रिरात्रमन्ततः ॥ १ ॥

अथ कर्णवेधः। वर्षे तृतीये पञ्चमे वा पुष्येन्दुचि-त्राहरिरेवतीषु पूर्वाह्णे कुमारस्य मधुरं दत्त्वा प्राङ्मुखा-योपविष्टाय दक्षिणं कर्णमभिमन्त्रयते—"भद्रं कर्णेभिः" इति, सव्यं 'वक्ष्यन्तीवेत्'"इति च । अथ भिन्द्यात्ततो

ब्राह्मणभोजनम् ॥ २ ॥

अष्टवर्षं ब्राह्मणमुपनयेद्गर्भाष्टमे वा, एकादशवर्षꣳ राजन्यं, द्वादशवर्षं वैश्यं, यथामङ्गलं वा सर्वेषाम् । ब्राह्मणान्भोजयेत्तं च पर्युप्तशिरसमलङ्कृतमानयन्ति । पश्चादग्नेरवस्थाप्य "ब्रह्मचर्यमागाम्"इति वाचयति "ब्रह्मचार्यसानि"इति च । अथैनं वासः परिधापयति—येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम् ॥ तेन त्वा परिदधाम्यायुष दीर्घायुत्वाय बलाय वर्चसे" इति । मेखलां बध्नीते—"इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात् ॥ प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयम्"इति । "युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः"इति वा । तूष्णीं वाऽत्र यज्ञोपवीतपरिधानम्—"यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः" ॥ "यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि"इति । अथाजिनं प्रयच्छति—"मित्रस्य चक्षुर्द्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳ समिद्धम् ॥ अनाहनस्यं वसनं जरिष्णुः परीदं वाज्याजिनं दधेहम्"इति, तूष्णीं वा । दण्डं प्रयच्छति—

तं प्रतिगृह्णाति—“यो मे दण्डः परापतद्वैहायसोऽधि-भूम्याम् ॥ तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय” इति । “दीक्षावदेके दीर्घसत्त्रमुपैति” इति वचनात् । अथास्याद्भिरञ्जलिनाऽञ्जलिं पूरयति “आपोहिष्ठा” इति तिसृभिः, अथैनꣳसूर्यमुदीक्षयति “तच्चक्षुः” इति, अथास्य दक्षिणाꣳसमधिहृदयमालभते—“मम व्रते ते हृदयं दधामि, मम चित्तमनुचित्तं ते अस्तु ॥ मम वाचमेकमना जुषस्व, बृहस्पतिष्ट्वा नियुनक्तु मह्यम्” इति । अथास्य दक्षिणꣳ हस्तं गृहीत्वाऽऽह—‘को नामासि’ इति ?, असावहं भोः३ इति प्रत्याह । अथैनमाह—‘कस्य ब्रह्मचार्यसि’ इति ?, भवत इत्युच्यमान इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासाविति । अथैनं भूतेभ्यः परिददाति “प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै” इति ॥ ३ ॥

प्रदक्षिणमग्निं परीत्योपविशति अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्तेऽथैनꣳ सꣳशास्ति ब्रह्मचार्यस्यपोशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समि-

धमाधेह्यपोशानेति । अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय दक्षिणतस्तिष्ठत आसीनाय वैके पच्छोऽर्द्धर्चशः सर्वाञ्च तृतीयेन सहानुवर्त्तयन्संवत्सरे षण्मास्ये चतुर्विंशत्यहे द्वादशाहे षडहे त्र्यहे वा सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयात्—"आग्नेयो वै ब्राह्मणः" इति श्रुतेः त्रिष्टुभꣳ राजन्यस्य, जगतीं वैश्यस्य सर्वेषां वा गायत्रीम् ॥ ४ ॥

अत्र समिदाधानम् । पाणिनाग्निं परिसमूहति—"अग्ने सुश्रवः सुश्रवसं मा कुरु ॥ यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं माꣳ सुश्रवः सौश्रवसं कुरु ॥ यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासम् इति । प्रदक्षिणमग्निं पर्युक्ष्योत्तिष्ठन्समिधमादधाति— "अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासꣳ स्वाहा"इति । एवं द्वितीया, तथा तृतीयाम् । एषा त इति वा, समुच्चयो वा । पूर्ववत्परिसमूहनपर्युक्षणे । पाणी प्रतप्य मुखं विमृष्टे—तनूपा अग्नेऽसि तन्वं मे पाह्या-

युर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि ॥ अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॥ मेधां मे देवः सविता आदधातु मेधां मे देवी सरस्वती आदधातु मेधामश्विनौ देवावाधत्तां पुष्करस्रजाविति अङ्गान्यालभ्य जपति—"अङ्गानि च म आप्यायतां वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम्" इति । त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम् ॥ ५ ॥

अत्र भिक्षाचर्यचरणम् ॥ भवत्पूर्वां ब्राह्मणो भिक्षेत । भवन्मध्यां राजन्यो भवदन्त्यां वैश्यः तिस्रोऽप्रत्याख्यायिन्यः । षड् द्वादशापरिमिता वा । मातरं प्रथमामेके । आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येके । अहिंसन्नरण्यात्समिधमाहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते । अधः शाय्यक्षारालवणाशी स्यात् । दण्डधारणमग्निपरिचरणम् गुरुशुश्रूषा भिक्षाचर्या मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत । अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेत्, दश, द्वादश वा प्रतिवेदम् । यावद्ग्रहणं वा । वासांसि शाणक्षौमाविकानि ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य । रौरवं राजन्यस्य आजं गव्यं वा

वैश्यस्य सर्वेषां वा गव्यमसति प्रधानत्वात् । मौञ्जी रशना ब्राह्मणस्य धनुर्ज्या राजन्यस्य मौर्वी वैश्यस्य । मुञ्जाभावे कुशाश्मन्तकबल्वजानाम् । पालाशो ब्राह्मणस्य दण्डः, बैल्वो राजन्यस्य, औदुम्बरो वैश्यस्य । केशसम्मितो ब्राह्मणस्य दण्डो, ललाटसंमितः क्षत्रियस्य, घ्राणसम्मितो वैश्यस्य सर्वे वा सर्वेषाम् । आचार्येणाहूत उत्थाय प्रतिशृणुयात् । शयानं चेदासीन आसीनं चेत्तिष्ठँस्तिष्ठन्तं चेदभिक्रामन्नभिक्रामन्तं चेदभिधावन् । स एवं वर्तमानोऽमुत्राद्य वसत्यमुत्राद्य वसतीति तस्य स्नातकस्य कीर्तिर्भवति । त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति । समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातकः । समाप्य व्रतमसमाप्य वेदं यः समावर्तते स व्रतस्नातकः उभयꣳ समाप्य यः समावर्तते स विद्याव्रतस्नातक इति । आषोडशाद्वर्षाद्ब्राह्मणस्य नातीतः कालो भवति आद्वाविꣳशाद्राजन्यस्य आचतुर्विꣳशाद्वैश्यस्य अत ऊर्ध्वं पतितसावित्रीका भवन्ति नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः कालातिक्रमे नियतवत् । त्रिपुरुषं पतितसावित्रीकाणामपत्येऽसंस्कारो नाध्यापनं च तेषाꣳ संस्कारेप्सुर्व्रात्यस्तोमेनेष्ट्वा काममधीयीरन्व्य-

वहार्या भवन्तीतिवचनात् ॥ ६ ॥

अथोपनीतो ब्राह्मणस्त्रिशिखः शिखी जटिलो मुण्डो वाक्षारालवणाशी स्यात्सावित्रꣳ षड्रात्रं त्रिरात्रꣳ सद्यः कालं वा चरेत्तदेव व्रतमुदीक्ष्य दण्डमग्नौनिधाय मेखलां यज्ञोपवीतं चाप्स्वन्तरिति प्रत्यृचं नमो वरुणायेति त्रिमधुरं दत्वा ततोऽस्याग्नेयं प्रथमं वेदव्रतमादिशेद्ब्राह्मणक्षत्रियविशां पञ्च सांवत्सरिकाणि वेदव्रतानि भवन्ति आग्नेयꣳ शुक्रियमौपनिषदꣳ शौलभङ्गोदानमिति । पञ्च सांवत्सरिकाणि वेदव्रतानि चरित्वा स्नात्वोपव्रतं चरेत् त्रिष्ववगुण्ठनꣳ शुक्रियादिषु शुक्रियꣳ शुक्राभिः श्रावयेदौपनिषदमौपनिषद्भिः शौलभꣳ शौलभिनीभिरथ वा विद्यमान आब्रह्मन्नुदीरतामानोभद्रा आशुःशिशान इमानुकमिति च वेदशिरसाऽवगुण्ठयेद वगुण्ठनीं त्रिवलिं पञ्चवलिं वा नाभिदेशात्प्रच्छाद्य वाग्यतोऽरण्येऽधः शयीत ग्रामे गोष्ठे देवतायतने वा व्युष्टायामवगुण्ठनीमरण्ये विसृजेदद्दश्रमस्योदुत्यं चित्रंदेवानामित्युदितेऽर्के जपति, वर्षति द्यौः शान्तिरिति शान्तिं करोति शान्तिभाजनं गुरवे दद्यात् । एवमेवावगुण्ठनीं च गोदाने गोमिथुनं तस्माद्गोदानमिति तस्माद्गोदानमिति ॥ ७ ॥

वेदꣳ समाप्य स्नायात् । ब्रह्मचर्यं वाऽष्टाचत्वारिꣳ

शके । द्वादशकेऽप्येके । गुरुणानुज्ञातो विधिर्विधेयस्तर्कश्च वेदः षडङ्गमेके न कल्पमात्रे कामं तु याज्ञिकस्य उपसंगृह्य गुरुꣳ समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात्स्थित्वाऽष्टानामुदकुम्भानाम् येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहास्खलो विरुजस्तनूदूषुरिन्द्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामीत्येकस्मादपो गृहीत्वा तेनाभिषिञ्चते । तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसायेति । येन श्रियमकृणुतां येनावमृशताꣳ सुराम् । येनाक्ष्यावभ्यषिञ्चतां यद्वां तदश्विना यश इति आपोहिष्ठेति च प्रत्यृचम् त्रिभिस्तूष्णीमितरैः । उदुत्तममिति मेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत्परिधायाऽऽदित्यमुपतिष्ठते—उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मागमय । उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थाद्दिवा यावभिरस्थाच्छतसनिरसि शतसनिं मा कुर्वाविदन्मा गमय । उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात्सायं यावभिरस्थात्सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मागमयेति दधि तिलान्वा प्राश्य जटालोमनखानि सꣳहृत्यौदुम्बरेण दन्तान्धावेत—"अन्नाद्याय व्यूहध्वꣳ सोमो राजायमाग-

मत् ॥ स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च" इति । उत्साद्य पुनः स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगृह्णीते—"प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पय" इति पितरः । शुन्धध्वमिति पाण्योरवनेजनं दक्षिणानिषिच्यानुलिप्य जपेत्-"सुचक्षा अहमक्षीभ्यां भूयासꣳसुवर्चा मुखेन ॥ सुश्रुत्कर्णाभ्यां भूयासम्" इति । अहतं वासो धौतं वाऽमैत्रेणाच्छादयीत—"परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि ॥ शतञ्च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये" इति अथोत्तरीयम्—"यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती ॥ यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम्" इति । एकं चेत् पूर्वस्योत्तरवर्गेण प्रच्छादयीत "सुमनसः प्रतिगृह्णाति या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेनच" इति । अथावबध्नीते-"यद्यशोऽप्सरसामिन्द्रश्चकारविपुलं पृथु ॥ तेन संग्रथिताः सुमनस आबध्नामि यशो मयि" इति । उष्णीषेण शिरो वेष्टयते-"युवा सुवासाः" इति । "अलंकरणमसि भूयोलंकरणं भूयात्" इति कर्णवेष्टकौ । वृत्रस्येत्यङ्क्त्यक्षिणी । रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते छत्रं प्रतिगृह्णाति बृहस्पतेश्छादिरसि पाप्मनो मामन्तर्द्धेहि तेजसो यशसो मामन्तर्द्धेहीति प्रतिष्ठस्थो विश्वतो मा-

पातमित्युपानहौ प्रतिमुञ्चते। "विश्वाभ्यो मा नाष्ट्राभ्यस्प-रिपाहि सर्वतः" इति वैणवं दण्डमादत्ते। दन्तप्रक्षालना-दीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः॥८॥

स्नातस्य यमान्वक्ष्यामः॥ कामादितरः नृत्यगी-तवादित्राणि न कुर्यान्न च गच्छेत्। "कामं तु गीतं गायति वैव गीते वा रमते" इति श्रुतेर्ह्यपरम् क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न च धावेत् उदपानावेक्षणवृक्षारोह-णफलप्रपतनसन्धिसर्पणाविवृतस्नानविषमलङ्घनशुक्तव-दनसन्ध्यादित्यावेक्षणभैक्षणानि न कुर्यान्न ह वै स्नात्वा भिक्षेतापह वै अस्नात्वा भिक्षाञ्जयतीतिश्रुतेः। वर्षत्यप्रा-वृतो व्रजेदयं मे वज्रः पाप्मानमपहनदिति अप्स्वात्मानं नावेक्षेत अजातलोम्नीं विपुंस्सीं षण्ढं च नोपहसेत्। न च गच्छेद्गर्भिणीं विजन्येतिब्रूयात्। सकुलमिति नकुल-म, भगालमिति कपालम्, मणिधनुरितीन्द्रधनुः गां धय-न्तीं परस्मै नाचक्षीत उर्वरायामनन्तर्हितायां भूमावुत्स-र्पीस्तिष्ठन्न मूत्रपुरीषे कुर्यात् स्वयं प्रशीर्णेन काष्ठेन गुदं प्रमृजीत। विकृतं वासो नाच्छादयीत। दृढव्रतो वधत्रः स्यात्सर्वत आत्मानं गोपायेत सर्वेषां मित्रमिव शुक्रि-यमध्येष्यमाणः॥ ९॥

तिस्रो णात्रीर्व्रतं चरेत् अमांस्साश्यमृन्मयपायी।

स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसंभाषणं च तैः। शवशूद्रसूतकान्नानि च नाद्यात् मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्सूर्याच्चात्मानं नान्तर्दधीत। तप्तेनोदकार्थान्कुर्वीत अवज्योत्य रात्रौ भोजनं सत्यवदनमेव वा। दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवांश्चेत् ॥ १० ॥

अथातः पञ्चमहायज्ञाः॥ वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयाद्ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति। भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथिव्यै धात्रे विधात्रे च द्वार्ययोः प्रतिदिशं वायवे दिशां च मध्ये त्रीन्ब्रह्मणेऽन्तरिक्षाय सूर्याय विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः। उषसे भूतानां च पतये परम्। पितृभ्यः स्वधा नम इति दक्षिणतः पात्रं निर्णिज्योत्तरापरस्यां दिशि निनयेद्यक्ष्मै तत्तइति उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्याद्धन्त त इति यथार्हं भिक्षुकानतिथींश्च सम्भजेरन्। बालज्येष्ठा गृह्या यथार्हमश्नीयुः। पश्चाद् गृहपतिः पत्नी च पूर्वो वा गृहपतिः। तस्मादु स्वादिष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयादिति श्रुतेः। अहरहः स्वाहा कुर्यादन्नाभावे केनचिदाकाष्ठाद्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रात् ॥ ११ ॥

"अथातो धर्मजिज्ञासा। केशान्तादूर्ध्वम-

पत्नीक उत्सन्नाग्निरनाग्निको वा प्रवासी ब्रह्मचारी चान्वग्निरिति ग्रामाग्निमाहृत्य पृष्ठोदिवीत्यधिष्ठाप्य त्रिभिश्च सावित्रैः प्रज्वाल्य ताꣳ सवितुस्तत्सवितुर्विश्वानि देव सवितरिति पूर्ववदक्षतैर्हुत्वा पाकं पचेत्तत्र वैश्वदेवं ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये विश्वेभ्यो देवेभ्योऽग्नये स्विष्टकृत इत्युपस्पृश्य पूर्ववद्बालिकमैवं कृते न वृथापाको भवति ॥ न वृथापाकं पचेन्न वृथा पाकमश्नीयादत्त पिण्डपितृयज्ञः पश्चादाग्रहणानि कुर्यात् ॥ १२ ॥

अथातोऽध्यायोपाकर्म औषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याꣳश्रावणस्य पञ्चमीꣳ हस्तेन वा आज्यभागाविष्ट्वाज्याहुतीर्जुहोति । पृथिव्या अग्नय इत्यृग्वेदे अन्तरिक्षाय वायव इति यजुर्वेदे दिवे सूर्यायेति सामवेदे दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे ब्रह्मणे च्छन्दोभ्यश्चेति सर्वत्र प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतय इति च । एतदेव व्रतादेशनविसर्गेषु । सदसस्पतिमित्यक्षतधानास्त्रिः सर्वेऽनुपठेयुः । हुत्वा हुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध आदध्युरार्द्राः सपलाशा घृताक्ताः सावित्र्या । ब्रह्मचारिणश्च पूर्वकल्पेन शन्नो भवन्त्वित्यक्षतधाना अखादन्तः प्रा-

श्नीयुः। दधिक्राव्ण इति दधि भक्षयेयुः। स यावन्तं गणमिच्छेत्तावतस्तिलानाकर्षफलकेन जुहुयात्सावित्र्या शुक्रज्योतिरित्यनुवाकेन वा प्राशनान्ते प्रत्यङ्मुखेभ्य उपविष्टेभ्य ओँकारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन्प्रब्रूयात्। ऋषिमुखानि बह्वृचानाम्। पर्वाणि छन्दोगानाम्। सूक्तान्यथर्वणानाम्। सर्वे जपति सह नोऽस्तु सह नोऽवतु सह न इदं वीर्यवदस्तु ब्रह्म इन्द्रस्तद्वेद येन यथा न विद्विषामह इति। त्रिरात्रं नाधीयीरन्। लोमनखानामनिकृन्तनम्। एके प्रागुत्सर्गात्॥ १३॥

वातेऽमावास्यायाꣳसर्वानध्यायः॥ श्राद्धाशने चोल्कावꣳस्फूर्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषु चाऽकालम्। उत्सृष्टेष्वभ्रदर्शने सर्वरूपे च त्रिरात्रं त्रिसन्ध्यं वा भुक्त्वार्द्रपाणिरुदके निशायाꣳसन्धिवेलयोरन्तः शवे ग्रामेऽन्तर्दिवाकीर्त्ये। धावतोऽभिशस्तपतितदर्शनाश्चर्याभ्युदयेषु च तत्कालम्। नीहारे वादित्रशब्द आर्त्तस्वने ग्रामान्ते श्मशानेऽश्वगर्दभोलूकशृगालसामशब्देषु शिष्टाचरिते च तत्कालम्। गुरौ प्रेतेऽपोऽभ्यवेयाद्दशरात्रं चोपरमेत्। स तानूनपात्राणि सब्रह्मचारिणि च त्रिरात्रम् एकरात्रमसब्रह्मचारिणि अर्द्धषष्ठान्मासानधीत्यो-

त्सृजेयुः अर्द्धसप्तमासान्वा। अथेमामृचं जपन्ति—"उमा कवी युवा यो नो धर्मः परापतत्। परिसंख्यस्य धर्मिणो विसंख्यानि विसृजामहे" इति। त्रिरात्रꣳ सहोष्य विप्रतिष्ठेरन्॥ १४॥

पौषस्य रोहिण्यांमध्यमायां वाऽष्टकायामध्यायानुत्सृजेरन्। उदकान्तं गत्वाद्भिर्देवाꣳश्छन्दाꣳसि वेदानृषीन्पुराणाचार्यान् गन्धर्वानितराचार्यान्संवत्सरं च सावयवं पितॄनाचार्यान्स्वांश्च तर्पयेयुः। सावित्रीं चतुरनुद्रुत्य विरताः स्म इति प्रब्रूयुः। क्षपणं प्रवचनं च पूर्ववत्॥ १५॥

पुण्याहे लाङ्गलयोजनं ज्येष्ठया वैन्द्रदैवत्यम् इन्द्रं पर्जन्यमश्विनौ मरुत उदला काश्यपꣳ स्वातिकारीꣳ सीतामनुमतिं च दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनडुहो मधुघृते प्राशयेत। सीरायुञ्जन्तीति योजयेत्। शुनꣳ सुफाला इति कृषेत् फालं वा लभेत। न वाऽग्न्युपदेशाद्वपनो निषङ्गाच्च अग्न्यमभिषिच्याकृष्टं तदाकृषेयुः स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन्सीतायज्ञे च ततो ब्राह्मणभोजनम्॥ १६॥

अथातः श्रवणाकर्म श्रावण्यां पौर्णमास्याम। स्थालीपाकꣳ श्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशं

धानानां भूयसीः पिष्ट्वाऽऽज्यभागाविष्टाऽऽज्याहुतीर्जुहोति—अपश्वेतपदाजहि पूर्वेण चापरेण च ॥ सप्त च वारुणीरिमाः प्रजाः सर्वाश्च राजबान्धवैः स्वाहा ॥ न वै श्वेतस्याध्याचारेऽहिर्ददर्श कञ्चन । श्वेताय वैदर्व्याय नमः स्वाहेति । स्थालीपाकस्य जुहोति विष्णवे श्रवणाय श्रावण्यै पौर्णमास्यै वर्षाभ्यश्चेति । धानावन्तमिति धानानाम् । घृताक्तान्सक्तून्सर्पेभ्यो जुहोति आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतये स्वाहा श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतये स्वाहाऽभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपतये स्वाहेति । सर्वहुतमेककपालं ध्रुवाय भौमाय स्वाहेति । प्राशनान्ते सक्तूनामेकदेशꣳ शूर्पे न्युप्योपनिष्क्रम्य बहिः शालायां स्थण्डिलमुपलिप्योल्कायां ध्रियमाणायां माऽन्तरा गमतेत्युक्त्वा वाग्यतः सर्पानवनेजयति आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्व श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वाभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्वेति । यथाऽवनिक्तं दर्व्योपघातꣳ सक्तून्सर्पेभ्यो बलिꣳ हरति आग्नेयपाण्डुपार्थिवानाꣳ सर्पाणामधिपत एषते बलिः श्वेतवायवान्तरिक्षाणाꣳ सर्पाणामधिपत एष

ते बलिरभिभूः सौर्यदिव्यानाᳬ सर्पाणामधिपत एष ते बलिरिति। अवनेज्य पूर्ववत्कङ्कतैः प्रलिखति आग्नेयपाण्डुपार्थिवानाᳬ सर्पाणामधिपते प्रलिखस्व श्वेतवायवान्तरिक्षाणाᳬ सर्पाणामधिपते प्रलिखस्वाभिभूः सौर्यदिव्यानाᳬ सर्पाणामधिपते प्रलिखस्वेति अञ्जनानुलेपनᳬ स्रजश्चाञ्जस्वानुलिम्पस्व स्रजोऽपिनह्यस्वेति। सक्तुशेषᳬ स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते। नमोऽस्तु सर्पेभ्य इति तिसृभिः। स यावत्कामयेत न सर्पा अभ्युपेयुरिति तावत्सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयादपश्वेतपदा जहीतिद्वाभ्याम्। दर्वीं शूर्पं प्रक्षाल्य प्रतप्य प्रयच्छति। द्वारदेशे मार्जयन्त आपोहिष्ठेति तिसृभिः अनुगुप्तमेतᳬ सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमितेऽग्निं परिचर्य दर्व्योपघातᳬ सक्तून्सर्पेभ्यो बलिᳬ हरेदाग्रहायण्यः तᳬ हरन्तं नान्तरेण गच्छेयुः। दर्व्याचमनं प्रक्षाल्य निदधाति धानाः प्राश्नन्ति सᳬयूताः ततो ब्राह्मणभोजनम् ॥ १७ ॥

प्रौष्ठपद्यामिन्द्रयज्ञः। पायसमैन्द्रᳬश्रपयित्वाऽपूपांश्चापूपैस्तीर्त्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोतीन्द्रायेन्द्राण्याजायैकपदेऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति। स्थालीपा-

कस्य जुहोतीन्द्राय स्वाहेति । प्राशनान्ते मरुद्भ्यो बलिꣳहरत्यहुतादो मरुत इति श्रुतेः । आश्वत्थेषु पलाशेषु मरुतोऽश्वत्थे तस्थुरितिवचनात् । शुक्र ज्योतिरिति प्रतिमन्त्रम् । विमुखेन च मनसा नामान्येषामेतानीति श्रुतेः इति इन्द्रं दैवीरिति जपति । ततो ब्राह्मणभोजनम् ॥ १८ ॥

आश्वयुज्यां पृषातकाः ॥ पायसमैन्द्रꣳ श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति । प्राशनान्ते दधिपृषातकमञ्जलिना जुहोत्यूनं मे पूर्यतां पूर्णं मे माव्यगात्स्वाहेति । दधिमधुघृतमिश्रमसात्या अवेक्षन्त आयात्विन्द्र इत्यनुवाकेन मातृभिर्वत्सान्सꣳसृज्य ताꣳ रात्रिमाग्रहायणीं च ततो ब्राह्मणभोजनम् ॥ १९ ॥

अथ सीतायज्ञः व्रीहियवानां यत्र यत्र यजेत तन्मयꣳ स्थालीपाकꣳ श्रपयेत् । कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतरꣳ स्थालीपाकꣳ श्रपयेत् । पूर्वचोदितत्वात्सन्देहः असम्भवाद्विनिवृत्तिः । क्षेत्रस्य पुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन । ग्रामे वोभयसम्प्रयोगादविरोधात् । यत्र श्रपयिष्यन्नुपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय तन्मि-

श्चैर्दर्भैस्तीर्त्वाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति । पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृताः ॥ तमिहेन्द्रमुपह्वये शिवा नः सन्तु हेतयः स्वाहा । यन्मे किञ्चिदुपेप्सित-मस्मिन्कर्मणि वृत्रहन् । तन्मे सर्वꣳ समृध्यतां जीवतः शरदः शतꣳ स्वाहा । संपत्तिर्भूतिर्भूमिर्वृष्टिर्ज्यैष्ठ्यꣳ श्रीः प्रजामिहावतु स्वाहा । यस्याभावे वैदिकलौकिकानां भूतिर्भवति कर्मणाम् । इन्द्रपत्नीमुपह्वये सीताꣳ सा मे त्वनपायिनी भूयात्कर्मणि कर्मणि स्वाहा । अश्वावती गोमती सूनृतावती बिभर्त्ति या प्राणभृतो अतन्द्रिता । खलमालिनीमुर्वरामस्मिन्कर्मण्युपह्वये ध्रुवाꣳ सा मे त्व-नपायिनी भूयात्स्वाहेति । स्थालीपाकस्य जुहोति सीतायै यजायै शमायै भूत्या इति । मन्त्रवत्प्रदानमे-केषाम् । स्वाहाकारप्रदाना इति श्रुतेर्विनिवृत्तिः । स्तरणशेषकुशेषु सीतागोप्तृभ्यो बलिꣳ हरति पुरस्ता-द्ये त आसते सुधन्वानो निषङ्गिणः । ते त्वा पुरस्ताद् गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति । अथ दक्षिणतोऽनिमिषा व-र्मिण आसते । ते त्वा दक्षिणतो गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीमामि-ति । अथ पश्चादाभुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुन-

ङ्गुरिः ॥ ते त्वा पश्चाद्गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति । अथोत्तरतो भीमा वायुः समाजवे ॥ ते त्वोत्तरतः क्षेत्रे खले गृहेऽध्वनि गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति । प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म । स्त्रियश्चोपयजेरन्नाचरितत्वात् । सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् सꣳस्थिते कर्मणि ब्राह्मणान्भोजयेत् ॥ २० ॥

इति गृह्यसूत्रे द्वितीयकाण्डं समाप्तम् ॥

अनाहिताग्नेर्नवप्राशनम् नवꣳ स्थालीपाकꣳ श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति—शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे ॥ शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा ॥ ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ॥ तेषां योऽज्यानिमजीजिमावहात् तस्मै नो देवाःपरिधत्तेह सर्वे स्वाहेति ॥ स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृते च स्विष्टमग्ने अभितत्पृणीहि विश्वांश्च देवः पृतना अविष्यत् ॥ सुगन्नु पन्थां प्रदिशं न एहि ज्योतिष्मद्ध्येह्यजरन्न आयुः स्वाहेति । अथ प्राश्नाति । अग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः ॥ शिवा अस्मभ्य-

मोषधीः कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैष्ट देवास्त्वया वशेन समशीमहि त्वा । स नो मयोऽभूः पितो आविशस्व शन्तोकाय तन्वैस्योन इति । अन्नपतीयया-वा अथ यत्रानामेतमुत्यं मधुना संयुतम् । यवꣳ सरस्वत्या अधिवनाय चकृषुः । इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानव इति ततो ब्राह्मणभोजनम् ॥ १ ॥

मार्गशीर्ष्याम्पौर्णमास्यामाग्रहायणीकर्म । स्थालीपाकꣳ श्रपयित्वा श्रवणवदाज्याहुतीर्हुत्वापराजुहोति या जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम् ॥ संवत्सरस्य या पत्नीः सा नो अस्तु सुमङ्गलीः स्वाहा ॥ संवत्सरस्य प्रतिमा या ताꣳ रात्रिमुपास्महे ॥ प्रजाꣳ सुवीर्यां कृत्वा दीर्घमायुर्व्यश्नवै स्वाहा ॥ संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्सराय कृणुते बृहन्नमः ॥ तेषां वयꣳ सुमतौ यज्ञियानां ज्योग्जीता अहता स्यामः स्वाहा ॥ ग्रीष्मो हेमन्त उत नो वसन्तः शिवा वर्षा अभया शरन्नः । तेषामृतूनाꣳ शतशारदानां निवात एषामभये वसेम स्वाहेति । स्थालीपाकस्य जुहोति—सोमाय मृगशिरसे मार्गशीर्ष्यै पौर्णमास्यै हेमन्तायचेति । प्राशनान्ते सक्तुशेषꣳ शूर्पे न्युप्योपनिष्क्रमणप्रभृत्यामार्जनात् । मार्जनान्ते

उत्सृष्टो बलिरित्याह । पश्चादग्नेः स्रस्तरमास्तीर्याहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति दक्षिणतः स्वामी जायोत्तरा यथा कनिष्ठमुत्तरतः । दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रꣳ शमीशाखासीतालोष्टाश्मनो निधायाग्निमीक्षमाणो जपति । अयमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः ॥ सुवीर्योऽयꣳ श्रेष्ठो दधातु नाविति । पश्चादग्नेः प्राञ्चमञ्जलिं करोति । दैवीं नावमिति तिसृभिः स्रस्तरमारोहन्ति । ब्रह्माणमामन्त्रयते ब्रह्मन्प्रत्यवरोहामेति । ब्रह्मानुज्ञाताः प्रत्यवरोहन्त्यायुः कीर्तिर्यशो बलमन्नाद्यं प्रजामिति । उपेता जपन्ति सुहेमन्तः सुवसन्तः सुग्रीष्मः प्रतिधीयतान्नः ॥ शिवा नो वर्षाः सन्तु शरदः सन्तु नः शिवा इति । स्योना पृथिवि नो भवेति दक्षिणपार्श्वैः प्राक्शिरसः संविशन्ति । उपोत्तिष्ठन्त्युदायुषा स्वायुषोत्पर्जन्यस्य वृष्ट्या पृथिव्याः सप्तधामभिरिति । एवं द्विरपरं ब्रह्मानुज्ञाताः । अधः शयीरंश्चतुरो मासान्यथेष्टं वा ॥ २ ॥

ऊर्ध्वमाग्रहण्यास्तिस्रोऽष्टका । ऐन्द्री वैश्वदेवी प्राजापत्या पित्र्येति । अपूपमाꣳसशाकैर्यथासंख्यम् । प्रथमाष्टका पक्षाष्टम्याम् । स्थालीपाकꣳ श्रपयित्वाज्यभागाविष्ट्वाज्याहुतीर्जुहोति । त्रिꣳशत्स्वसार उपयन्ति निष्कृतिꣳ

समानं केतुं प्रतिमुञ्चमानाः। ऋतुंस्तन्वते कवयः प्रजानतीमध्ये छन्दसः परियन्ति भास्वतीःस्वाहा ॥ ज्योतिष्मती प्रतिमुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि । विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा । एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् । तेन दस्यून्व्यसहन्त देवा हन्तासुराणामभवच्छचीभिः स्वाहा । अनानुजामनुजां मामकर्त सत्यं वदन्त्यन्विच्छ एतत् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामति मा प्रयुक्तः स्वाहा । अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् । भूयासमस्य सुमतौ यथा यूयमन्यावो अन्यामति मा प्रयुक्तः स्वाहा । पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्च नाम्नीमृतवोऽनुपञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरधिलोकमेकꣳ स्वाहा । ऋतस्य गर्भः प्रथमा व्युषिष्यपामेका महिमानं बिभर्ति । सूर्यस्यैका चरति निष्कृतेषु धर्मस्यैकासवितैकान्नियच्छतु स्वाहा । या प्रथमा व्यौच्छत्सा धेनुरभवद्यमे । सा नः पयस्वती धुक्ष्वोत्तरामुत्तराꣳ समाꣳस्वाहा । शुक्रऋषभा नभसा ज्योतिषागाद्विश्वरूपा शबली अग्निकेतुः ॥ समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष

आगाःस्वाहा ॥ ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम् ॥ एका सती बहुधोषो व्यौच्छत्सा जीर्णा त्वं जरयसि सर्वमन्यत् स्वाहेति । स्थालीपाकस्य जुहोति। शान्ता पृथिवी शिवमन्तरिक्षꣳ शन्नो द्यौरभयं कृणोतु ॥ शं नो दिशः प्रदिश आदिशोनोऽहोरात्रे कृणुतं दीर्घमायुर्व्यश्नवै स्वाहा ॥ आपो मरीचीः परिपान्तु सर्वतो धाता समुद्रो अपहन्तु पापम् ॥ भूतं भविष्यदकृतद्विश्वमस्तु मे ब्रह्माभिगुप्तः सुरक्षितः स्याꣳ स्वाहा ॥ विश्वे आदित्या वसवश्च देवता रुद्रा गोप्तारो मरुतश्च सन्तु ॥ ऊर्जं प्रजाममृतं दीर्घमायुः प्रजापतिर्मयि परमेष्ठी दधातु नः स्वाहेति । अष्टकायै स्वाहेति । मध्यमा गवा तस्यै वपां जुहोति वह वपां जातवेदः पितृभ्य इति । श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसव्याभ्यां परिवृते पिण्डपितृयज्ञवत । स्त्रीभ्यश्चोपसेचनं चकर्षूषु सुरया तर्पणेन चाञ्जनानुलेपनꣳ स्रजश्च । आचार्यान्तेवासिभ्यश्चानपत्येभ्य इच्छन् मध्या वर्षे च तुरीया शाकाष्टका ॥ ३ ॥

अथातःशालाकर्म । पुण्याहे शालां कारयेत्तस्या अवटमभिजुहोत्यच्युताय भौमाय स्वाहेति । स्तम्भमुच्छ्रयतीमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनाम् ॥ इहैव ध्रुवान्निमिनोमि शालां क्षेमे तिष्ठ-

तु घृतमुच्छ्रमाणा । अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय ॥ आत्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः ॥ आत्वा कुमारस्तरुण आवत्सो जगदैः सह ॥ आत्वा परिस्रुतः कुम्भ आदध्नः कलशैरुप । क्षेमस्य पत्नी बृहती सुवासा रयिं नो धेहि सुभगे सुवीर्यम् ॥ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव ॥ अभिनः पूर्यताꣳ रयिरिदमनुश्रेयो वसान इति चतुरः प्रपद्यते । अभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकꣳ श्रपयित्व निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणमामन्त्रयते ब्रह्मन् प्रविशामीति । ब्रह्मानुज्ञातः प्रविशत्यृचम्प्रपद्ये शिवं प्रपद्य इति आज्यꣳ संस्कृत्येहरतिरित्याज्याहुतीर्हुत्वापरा जुहोति । वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवानः ॥ यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे स्वाहा ॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ॥ अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥ वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या ॥ पाहि क्षेम उत योगे वरन्नो यूय-

ष्पात स्वस्तिभिः सदा नः स्वाहा ॥ अमी वहा वास्तो-
ष्पते विश्वारूपाण्याविशन् ॥ सखा सुशेव एधि नः स्वा-
हेति । स्थालीपाकस्य जुहोति । अग्निमिन्द्रं बृहस्पतिं वि-
श्वांश्वदेवानुपह्वये । सरस्वतीं च वाजीं च वास्तुमे दत्त-
वाजिनः स्वाहा । सर्पदेवजनान् सर्वान्हिमवन्तꣳसुदर्श-
नम् । वसूंश्च रुद्रानादित्यानीशानं जगदैः सह ॥ एता-
न्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥ पूर्वा-
ह्णमपराह्णंचोभौ मध्यं दिना सह प्रदोषमर्द्धरात्रं च व्यु-
ष्टां देवी महापथाम् ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त
वाजिनः स्वाहा ॥ कर्तारं च विकर्तारं विश्वकर्माणमो-
षधींश्च वनस्पतीन् ॥ एतान्सर्वान्प्रपद्येऽहं वास्तु मे द-
त्तवाजिनः स्वाहा ॥ धातारं च विधातारं निधीनां च
पतिꣳ सह ॥ एतान्सर्वान्प्रपद्ये हं वास्तु मे दत्त वाजि-
नः स्वाहा ॥ स्योनꣳ शिवमिदं वास्तु दत्तं ब्रह्मप्रजाप-
ती ॥ सर्वाश्च देवताः स्वाहेति प्राशनान्ते कांꣳस्ये स-
म्भारꣳ नोप्यौदुम्बरपालाशानि ससुराणि शाड्वलं गोमयं
दधि मधु घृतं कुशान्यवांश्चासनोपस्थानेषु प्रोक्षेत्पूर्वे
सन्धावभिमृशति—श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपाये-
तामिति । दक्षिणे सन्धावभिमृशति—यज्ञश्च त्वा दक्षिणा
च दक्षिणे सन्धौ गोपायेतामिति । पश्चिमे सन्धावभिमृश-

ति अन्नं च त्वा ब्राह्मणाश्च पश्चिमे सन्धौ गोपायेतामिति।
उत्तरे सन्धावभिमृशति—ऊ उर्क त्वा सूनृता चोत्तरे
सन्धौ गोपायेतामिति। निष्क्रम्य दिश उपतिष्ठते—केता
च मा सुकेता च पुरस्ताद्गोपायेतामित्यग्निर्वैकेतादित्यः सु-
केता तौप्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्ताद्गोपायेता-
मिति। अथ दक्षिणतो गोपायमानं च मा रक्षमाणा च
दक्षिणतो गोपायेतामित्यहर्वै गोपायमानꣳ रात्री रक्ष-
माणा ते प्रपद्ये ताभ्यां नमोऽस्तु ते मा दक्षिणतो गो-
पायेतामिति। अथ पश्चाद्दीदिविश्च मा जागृविश्च पश्चा-
द्गोपयेतामित्यन्नं दीदिविः प्राणो जागृविस्तौ प्रपद्ये ता-
भ्यां नमोऽस्तु तौ मा पश्चाद्गोपायेतामिति। अथोत्तर-
तो स्वप्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति चन्द्र-
मा वा अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽ-
स्तु तौ मोत्तरतो गोपायेतामिति। निष्ठितां प्रपद्यते
धर्मस्थूणाराजꣳ श्रीस्तूपमहोरात्रे द्वारफलके॥ इन्द्रस्य
गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः
सह॥ यन्मे किञ्चिदस्त्युपहूतः सर्वगणः सखायः साधुस-
म्मतः॥ तां त्वा शालेऽरिष्टवीरा गृहान्नः सन्तु सर्वत-
इति ततो ब्राह्मणभोजनम्॥ ४॥

"अथातो वापीकूपतडागारामदेवतायतनपुष्करि-

णग्रामप्रतिष्ठापनं व्याख्यास्यामः। तत्रोदगयन आपूर्य्यमाणपक्षे पुण्याहे तिथिवारकरणे नक्षत्रे च गुणान्विते तत्र वारुणं यवमयं चरुꣳ श्रपयित्वाज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति—त्वन्नो अग्ने सत्वन्नो अग्न इमं मे वरुण तत्त्वायामि ये ते शतमयाश्चाग्न उदुत्तममुरुꣳ हि राजा वरुणस्योत्तम्भनमग्नेरनीकमिति दशर्चꣳ हुत्वा स्थालीपाकस्य जुहोति—अग्नये स्वाहा सोमाय स्वाहा वरुणाय स्वाहा यज्ञाय स्वाहोग्राय स्वाहा भीमाय स्वाहा शतक्रतवे स्वाहा व्युष्ट्यै स्वाहा स्वर्गाय स्वाहेति । यथोक्तꣳ स्विष्टकृत्प्राशनान्ते जलचराणि क्षिप्त्वाऽलंकृत्य गां तारयित्वा पुरुषसूक्तं जपन्नाचार्याय वरं दत्वा कर्णवेष्टकौ वासाꣳसि धेनुर्दक्षिणा, ततो ब्राह्मणभोजनम् ॥ ५ ॥"

अथातो मणिकावधानम् । उत्तरपूर्वस्यां दिशि यूपवदवटं खात्वा कुशानास्तीर्याक्षतानरिष्टकान्सुमनसः कपर्दकांश्चान्यानि चाभिमङ्गलानि तस्मिन् मिनोति—"मणिकꣳ समुद्रोऽसि" इति । अप आसिञ्चति—"आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ॥ रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद्गृणते वयोधात्" इति, आपोहिष्ठेति च तिसृभिः । ततो ब्राह्मणभोजनम् ॥ ६ ॥

अथातः शीर्षरोगभेषजम् । पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि—चक्षुर्भ्याꣳ श्रोत्राभ्यां गोदानाच्छुबुकादधि ॥ यक्ष्मꣳ शीर्षण्यꣳ रराटाद्विवृहामीममिति । अर्द्धच्छेदत्रभेदककविरूपाक्ष श्वेतपक्ष महायशः ॥ अथो चित्रपक्षाशिरो माऽस्याभितप्सीदिति, क्षेम्यो ह्येव भवति ॥ ७ ॥

उतूलपरिमेहः । स्वपतो जीवविषाणे स्वं मूत्रमासिच्यापसलवि त्रिः परिषिञ्चन्परीयात् । परि त्वा गिरेरहं परिमातुः परिस्वसुः ॥ परिपित्रोश्च भ्रात्रोश्च सख्येभ्यो विसृजाम्यहम् ॥ उतूल परिमीढोऽसि परिमीढः क्व गमिष्यसीति । स यदि अभ्यागच्छेदग्निमुपसमाधाय घृताक्तानि कुशेण्डूवानि जुहुयात् । परि त्वा ह्वल नो ह्वल निर्वृत्तेन्द्रवीरुधः ॥ इन्द्रपाशेन सित्वा मह्यं मुक्त्वाथान्यमानयेदिति क्षेम्यो ह्येव भवति ॥ ८ ॥

शूलगवः । स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्यः । औपासनमरण्यꣳ हृत्वा वितानꣳ साधयित्वा रौद्रं पशुमालभेत साण्डम् । गौर्वाशब्दात् । वपाꣳ श्रपयित्वा स्थालीपाकमवदानानि च रुद्राय वपामन्तरिक्षाय वसाꣳ स्थालीपाकमिश्राण्यवदानानि जुहोत्यग्नये रुद्राय शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानायेति च वनस्पतिः स्विष्टकृदन्ते दि-

र्व्याघारणम् । व्याघारणान्ते पत्नीः संयाजयन्तीन्द्राण्यै रुद्राण्यै शर्वाण्यै भवान्या अग्निं गृहपतिमिति । लोहितं पालाशेषु कूर्चेषु रुद्राय सेनाभ्यो बलिꣳ हरति यास्ते पुरतात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते दक्षिणतः सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते पश्चात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्रोत्तरतः सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्रोपरिष्टात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमो यास्ते रुद्राधस्तात्सेनास्ताभ्य एष बलिस्ताभ्यस्ते नम इति । ऊवध्यं लोहितलिप्तमग्नौ प्रास्यत्यधो वा निखनति । अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वाऽनुवाकाभ्याम् । नैतस्य पशोर्ग्रामꣳ हरति । एतेनैव गोयज्ञो व्याख्यातः । पायसेनानर्थलुप्तः तस्य तुल्यवया गौर्दक्षिणा ॥ ९ ॥

अथ वृषोत्सर्गो गोयज्ञेन व्याख्यातः । कार्तिक्यां पौर्णमास्याꣳ रेवत्यां वाऽऽश्वयुजस्य मध्येगवाꣳ सुसमिद्धमग्निं कृत्वाऽऽज्यꣳसंस्कृत्येहरतिरिति षट् जुहोति प्रतिमन्त्रम् पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः ॥ पूषा वाजꣳसनोतु नः स्वाहेति पौष्णस्य जुहोति । रुद्राञ्जपित्वैकवर्णं द्विवर्णं वायोर्वा यूथं छादयति यं वा

यूथं छादयेद्रोहितो वैव स्यात्सर्वाङ्गैरुपेतो जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपस्वित्तमः स्यात्तमलंकृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चालंकृत्यैतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्च रथप्रियेण ॥ मा नः साप्तजनुषाऽसुभगा रायस्पोषेण समिषा मदेमेत्येतयैवोत्सृजेरन् । नभ्यस्थमभिमन्त्रयते मयोभूरित्यनुवाकशेषेण वामे चक्रं दक्षिणे त्रिशूलꣳ सर्वासां पयसि पायसꣳश्रपयित्वा ब्राह्मणान्भोजयेत् । पशुमप्येके कुर्वन्ति तस्य शूलगवेन कल्पो व्याख्यातः ॥ १० ॥

अथोदककर्म अद्विवर्षे प्रेते मातापित्रोराशौचम् । शौचमेवेतरेषामेकरात्रं त्रिरात्रं वा शरीरमदग्ध्वा निखनन्ति अन्तः सूतके चेदोत्थानादाशौचꣳ सूतकवत् । नात्रोदककर्म । द्विवर्षप्रभृति प्रेतमाश्मशानात्सर्वेऽनुगच्छेयुः यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके । यद्युपेतो भुमिजोषणादि समानमाहिताग्नेरोदकान्तस्य गमनात् शालाग्निना दहन्त्येनमाहितश्चेत् । तुष्णीं ग्रामाग्निनेतरम् । संयुक्तं मैथुनं वोदकं याचेरन्नुदकं करिष्यामह इति कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते कुरुध्वमेवेतरास्मिन् सर्वे ज्ञातयोऽपोभ्यवयन्त्यासप्तमात्पुरुषाद्दशमाद्वा समानग्राम-

वासे यावत्सम्बन्धमनुस्मरेयुः । एकवस्त्राः प्राचीनावीतिनः सव्यस्यानामिकयापनोद्यापनः शोशुचदघमिति दक्षिणामुखा निमज्जन्ति प्रेतायोदकꣳ सकृत्प्रसिञ्चन्त्यञ्जलिनाऽसावेतत्त उदकमिति उत्तीर्णाञ्छुचौ देशे शाड्वलवत्युपविष्टांस्तत्रैनानपवदेयुः । अनवेक्षमाणा ग्राममायान्ति रीतीभूताः कनिष्ठपूर्वाः । निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपांस्तैलमालभ्याऽश्मानमाक्रम्य प्रविशन्ति त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वीरन् क्रीत्वा लब्ध्वा वा दिवैवान्नमश्नीयुरमाꣳसम्प्रेताय पिण्डं दत्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहम् । मृन्मये ताꣳ रात्रीं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति त्रिरात्रꣳ । शावमाशौचम्, दशरात्रमित्येके । न स्वाध्यायमधीयीरन् नित्यानि निवर्तेरन्वैतानवर्जम् शालाग्नौ चैके । अन्य एतानि कुर्युः । प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात् । रात्रौ चेदादित्यस्य प्रवेशनादि समानमितरैः । पक्षं द्वौ वाऽऽशौचम् । आचार्ये चैवम् । मातामहयोश्च स्त्रीणां चाप्रत्तानाम् । प्रत्तानामितरे कुर्वीरन् । ताश्च तेषाम् । प्रोषितश्चेत्प्रेयाच्छ्रवणप्रभृति कृतोदकाः कालशेषमासी-

रन् । अतीतश्चैकरात्रं त्रिरात्रं वा । अथ कामोदकान्यृत्विक्श्वशुरसखिसम्बन्धिमातुलभागिनेयानाम्। प्रत्तानां चैकादश्यामयुग्मान्ब्राह्मणान्भोजयित्वा मा२ सवत् । प्रेतायोद्दिश्य गामप्येके घ्नन्ति पिण्डकरणे प्रथमः पितॄणां प्रेतः स्यात्पुत्रवांश्चेत् । निवर्तेत चतुर्थः संवत्सरं पृथगेके । न्यायस्तु न चतुर्थः पिण्डो भवतीति श्रुतेः अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात् । पिण्डमप्येके निपृणन्ति ॥ ११ ॥

पशुश्चेदाप्लाव्यागामग्रेणाग्नीन्परीत्य पलाशशाखान्निहन्ति परिव्ययणोपाकरणानियोजनप्रोक्षणान्यावृता कुर्याद्यच्चान्यत् । परिपशव्ये हुत्वा तूष्णीमपराः पञ्च वपोद्धरणं चाभिघारयेद्देवताञ्चादिशेत् । उपाकरणनियोजनप्रोक्षणेषु स्थालपाके चैवम् । वपा२ हुत्वाऽवदानान्यवद्यति सर्वाणि त्रीणि पञ्च वा स्थालीपाकमिश्राण्यवदानानि जुहोति पश्वङ्गं दक्षिणा यद्देवते तद्दैवतं यजेत्तस्मै च भागं कुर्यात्तं च ब्रूयादिममनुप्रापयेति नद्यन्तरे नावं कारयेन्नवा ॥ १२ ॥

अथातोऽवकीर्णिप्रायश्चित्तम् । अमावास्याया चतुष्पथे गर्दभं पशुमालभते निर्ऋतिं पाकयज्ञेन यजेत । अप्स्ववदानहोमः भूमौ पशुपुरोडाशश्रपणम् ।

तां छविं परिदधीत ! ऊर्ध्वबालामित्येके । सम्वत्सरं भिक्षाचर्यं चरेत्स्वकर्म परिकीर्तयन् । अथापरमाज्याहुतीर्जुहोति । कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहेति । अथोपतिष्ठते सम्मा सिञ्चन्तु मरुतः समिन्द्रः संबृहस्पतिः । सं मा यमग्निः सिञ्चतु प्रजया च धनेन चेति एतदेव प्रायश्चित्तम् ॥ १३ ॥

अथातः सभाप्रवेशनम् । सभामभ्येति सभाङ्गिरसि नादिर्नामासि त्विषिर्नामासि तस्यैते नम इति । अथ प्रविशति सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ सचेतसौ ॥ यो मा न विद्यादुपमासतिष्ठेत्सचेतनो भवतु शंसथे जन इति पर्षदमेत्य जपेदाभिभूरहमागमं विराडप्रतिवाश्याः ॥ अस्याः पर्षद ईशानः सहसा सुदुष्टरो जन इति । स यदि मन्येत क्रुद्धोऽयमिति तमभिमन्त्रयते या त एषा रराट्या तनूर्मन्योः क्रोधस्य नाशनी ॥ तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः ॥ द्यौरहं पृथिवी चाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्य्यसहासाविति । अथ यदि मन्येत द्रुग्धोऽयमिति तमभिमन्त्रयते तान्ते वाचमास्यआदत्ते हृदय आदधे यत्र यत्र निहिता वाक्तां ततस्तत आददे यदहं ब्रवीमि तत्सत्यम-

धरोमत्तांयस्त्वेति । एतदेव वशीकरणम् ॥ १४ ॥

अथातो रथारोहणम् । युङ्क्तेति रथं संप्रेष्य युक्त इति प्रोक्ते सावित्राडिस्येत्य चक्रे अभिमृशति रथन्तरमसीति दक्षिणम् । बृहदसीत्युत्तरम् । वामदेव्यमसीति कूबरीम्ँ हस्तेनोपस्थमभिमृशति । अङ्कौन्यङ्कावभितो रथं यौ ध्वान्तं वाताग्रमनुसञ्चरन्तम् । दूरेहेतिरिन्द्रियवान्पतत्रि ते नोऽग्नयः पप्रयः पारयन्त्विति नमो माणिचरायेति दक्षिणं धुर्यं प्राजति । गवां मध्ये स्थापयत्यपाप्य देवताः प्रत्यवरोहेत्संप्रति ब्राह्मणान्मध्ये गा अभिक्रम्य पितॄन् । न स्त्री ब्रह्मचारिणौ सारथी स्याताम् । मुहूर्तमतीयाय जपेदिहरतिरिहरमध्वम् । एके मास्विह रतिरिति च । स यदि दुर्बलो रथः स्यात्तमास्थाय जपेदयं वामश्विना रथो मा दुर्गे मास्तरोरिषादिति । स यदि भ्रम्याद्भूस्याँ स्तम्भमुपस्पृश्य भूमिं वा जपेदेवं वामाश्विना रथो मा दुर्गे मास्तरोरिषदिति । तस्य न काचनार्तिर्न रिष्टिर्भवति या त्वाऽध्वानं विमुच्य रथं यवसोदके दापयेदेष उह वाहनस्यापह्नव इति श्रुतेः ॥ १५ ॥

अथातो हस्त्यारोहणम् । एत्य हस्तिनमभिमृशति हस्तियशसमसि हस्तिवर्चसमसीति । अथारोहतन्द्रिस्य त्वा वज्रेणाभितिष्ठामि स्वस्ति मा सम्पारयेति । एतेनै-

वाश्वारोहणं व्याख्यातम् । उष्ट्रमारोक्ष्यन्नभिमन्त्रयते त्वाष्ट्रोऽसि त्वष्टृदैवत्यः स्वस्ति मा सम्पारयेति । रासभमारोक्ष्यन्नभिमन्त्रयते शूद्रोऽसि शूद्रजन्माग्नेयो वै द्विरेताः स्वस्ति मा सम्पारयेति । नदीमुत्तरिष्यन्नभिमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा सम्पारयेति । नावमारोक्ष्यन्नभिमन्त्रयते सुनावमिति । उत्तरिष्यन्नभिमन्त्रयते सुत्रामाणमिति । वनमभिमन्त्रयते नमो रुद्राय वनसदे स्वस्ति मा सम्पारयेति । गिरिमभिमन्त्रयते नमो रुद्राय गिरिषदे स्वस्ति मा सम्पारयेति । चतुष्पथमभिमन्त्रयते नमो रुद्राय पथिषदे स्वस्ति मा सम्पारयेति । श्मशानमभिमन्त्रयते नमो रुद्राय पितृषदे स्वस्ति मा सम्पारयेति । गोष्ठमभिमन्त्रयते नमो रुद्राय शकृत्पिण्डसदे स्वस्ति मा सम्पारयेति । यत्र चान्यत्रापि नमो रुद्रायेत्येव ब्रूयाद्रुद्रो ह्येवेदꣳ सर्वमिति श्रुतेः । सिचाऽवधूतोऽभिमन्त्रयते सिगसि न वज्रोऽसि नमस्ते अस्तु मा माहिꣳसीरिति । स्तनयित्नुमभिमन्त्रयते शिवा नो वर्षाः सन्तु शिवा नः सन्तु हेतयः । शिवा नस्ताः सन्तु यास्त्वꣳ सृजसि वृत्रहन्निति । शिवा वाश्यमानामभिमन्त्रयते शिवो नामेति । शकुनिं वाश्यमानमभिमन्त्रयते हिरण्यपर्णशकुने देवानां प्रहितं

गम ॥ यमदूत नमस्ते अस्तु किन्त्वाकार्क्कारिणोऽब्रवी-
दिति। क्षेम्यो ह्येव भवति। लक्षण्यं वृक्षमभिमन्त्रयते मा
त्वाऽशनिर्मा परशुर्म्मा वातो मा राजप्रेषितो दण्डः ॥
अङ्कुरास्ते प्ररोहन्तु निवाते त्वाऽभिवर्षतु । अग्निष्टे
मूलम्माहिꣳसीत्स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु
वनस्पत इति। स यदि किंचिल्लभेत तत्प्रतिगृह्णाति द्यौस्त्वा
ददातु पृथिवी त्वा प्रतिगृह्णात्विति। अथ यद्योदनं लभेत्
तत्प्रतिगृह्णाति द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णा-
त्विति । तस्य द्विः प्राश्नाति ब्रह्मा त्वा ऽश्नातु ब्रह्मा
त्वा प्राश्नात्विति । अथ यदि मन्थं लभेत् तम्प्रातिगृ-
ह्णाति द्यौस्त्वा ददातु पृथिवी त्वाप्रातिगृह्णात्विति । तस्य
त्रिः प्राश्नाति ब्रह्मा त्वा ऽश्नातु ब्रह्मा त्वा प्राश्नातु ब्रह्मा
त्वा पिबत्विति । अथातोऽधीत्याधीत्यानिराकरणम् ।
प्रतीकम्मे विचक्षणं जिह्वा मे मधु यद्वचः ॥ कर्णा-
भ्या भूरि शुश्रुवे मा त्वꣳ हार्षीच्छ्रुतम्मयि ॥ ब्र-
ह्मणः प्रवचनमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्म-
कोशोऽसि । सनिरसि शान्तिरस्यनिराकरणमसि ब्रह्म-
कोशम्मे विश ॥ वाचा त्वा पिदधामि वाचा त्वा पिद-
धामीति तिष्ठ प्रतिष्ठ स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्य-
ग्रहणधारणोच्चारणशक्तिर्मयि भवतु आप्यायन्तु मे-

ङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम् ॥ यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ १६ ॥

इति श्रीपारस्काराचार्यविरचिते गृह्यसूत्रे तृतीयकाण्डः समाप्तः ॥ ३ ॥

अथ श्राद्धसूत्रम् ॥ का० प० सूत्रे—अपरपक्षे श्राद्धं कुर्वीतोर्ध्वं वा चतुर्थ्या यदहः सम्पद्येत तदहर्ब्राह्मणानामन्त्र्य पूर्वेद्युर्वा स्नातकानेके यतीन्गृहस्थान् साधून् वा श्रोत्रियान् वृद्धाननवद्यान्स्वकर्मस्थानभावेऽपि शिष्यान् स्वाचारान्द्विर्नग्नशुक्लविक्लिधश्यावदन्तविद्धप्रजननव्याधितव्यङ्गिश्वित्रिकुष्ठिकुनखिवर्ज्यमनिन्द्येनामन्त्रितो नापक्रामेदामन्त्रितो वान्यदन्नं न प्रतिगृह्णीयात्स्नाताञ्छुचीनाचान्तान्प्राङ्मुखानुपवेश्य दैवे युग्मानयुग्मान्यथाशक्ति पित्र्य एकैकस्योदङ्मुखान्द्वौ वा दैवे त्रीन् पित्र्य एकैकमुभयत्र वा मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम् श्रद्धान्वितः श्राद्धं कुर्वीत शाकेनापि नापरपक्षमतिक्रामेन्मासि मासि वोशनमिति श्रुतेस्तदहः शुचिरक्रोधनो ऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथुनश्रमस्वाध्यायान्वर्जयेदावाहनादि वाग्यत उपस्पर्शनादामन्त्रिताश्चैवम् ॥ १ ॥

दैवपूर्वं श्राद्धं पिण्डपितृयज्ञवदुपचारः पित्र्ये द्वि-

गुणास्तु दर्भाः पवित्रपाणिर्दद्यादासीनः सर्वत्र प्रश्नेषु पङ्क्तिमूर्धन्यं पृच्छति सर्वान्वासनेषु दर्भानास्तीर्य विश्वान्देवानावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो विश्वेदेवास आगतेत्यनयाऽऽवाह्यावकीर्य विश्वेदेवाः शृणुतेममिति जपित्वा पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञात उशन्तस्त्वेत्यनयाऽऽवाह्यावकीर्याऽऽयन्तु न इति जपित्वा यज्ञियवृक्षचमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नप आसिञ्चति शन्नोदेवीरित्येकैकस्मिन्नेव तिलानावपति तिलोऽसिसोमदैवत्यो गोसवे देवनिर्मितः। प्रत्नमद्भिः प्रक्तः स्वधया पितॄँल्लोकान्प्रीणाहि नः स्वाहेति सौवर्णराजतौदुम्बरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यन्ते पत्रपुटेषु वैकैकस्यैकैकेन ददाति सपवित्रेषु हस्तेषु या दिव्या आपः पयसा सम्बभूवुर्या अन्तरिक्षा उत पार्थिवीर्याः॥ हिरण्यवर्णा यज्ञियास्तान आपः शिवाः शिवतमाः सश्स्योनाः सुहवा भवन्त्वित्यसावेष तेऽर्घ इति प्रथमे पात्रे सश्स्रवान्समवनीय पितृभ्यः स्थानमसीति न्युब्जं पात्रं निदधात्यत्र गन्धपुष्पधूपदीपवाससां च प्रदानम्॥ २॥

उद्धृत्य घृताक्तमन्नं पृच्छति—अग्नौ करिष्य इति

कुरुष्वेत्यनुज्ञातः पिण्डपितृयज्ञवद्धुत्वा हुतशेषं दत्वा पात्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहेति वैष्णव्यर्चा यजुषा वाऽङ्गुष्ठमन्नेऽवगाह्यापहता इति तिलान्प्रकीर्योष्णꣳ स्विष्टमन्नं दद्याच्छक्त्या वाश्नत्सु जपेत् व्याहृतिपूर्वां गायत्रीꣳ सप्रणवाꣳ सकृत्त्रिर्वा राक्षोघ्नीः पित्र्यमन्त्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि तृप्तान् ज्ञात्वाऽन्नं प्रकीर्य सकृत्सकृदपो दत्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधुमध्वित्ति च तृप्ताः स्थेति पृच्छति तृप्ताःस्म इत्यनुज्ञातःशेषमन्नमनुज्ञाप्य सर्वशेषमन्नमेकतोध्दृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रीन्पिण्डानवनेज्य दद्यादाचान्तेष्वित्येक आचान्तेषु उदकं पुष्पाण्यक्षतानक्षय्योदकं च दद्यादघोराः पितरः सन्तु सन्त्वित्युक्ते गोत्रं नो वर्धतां वर्धतामित्युक्ते दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च॥ श्रद्धा च नो मा व्यगमद्व बहु देयं च नोऽस्त्वित्याशिषः प्रतिगृह्य स्वधा वाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामित्यस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो निषिञ्चत्यूर्जमित्युत्तानं पात्रं

कृत्वा यथाशक्ति दक्षिणां दद्याद्ब्राह्मणेभ्यो विश्वेदेवाः प्रीयन्तामिति दैवे वाचयित्वा वाजेवाजेवतेति विसृज्याऽऽमावाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्य नमस्कृत्योपविशेत्॥३॥

अथैकोद्दिष्टम्—एकोर्घ एकं पवित्रमेकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमितीतरे ब्रूयुरुपतिष्ठतामित्यक्षय्यस्थानेऽभिरम्यतामिति विसर्गोऽभिरताः स्म इतीतरे ॥ ४ ॥

ततः संवत्सरे पूर्णे त्रिपक्षे द्वादशाहे वा यदहर्वा वृद्धिरापद्येत चत्वारि पात्राणि सतिलगन्धोदकानि पूरयित्वा त्रीणि पितृणामेकं प्रेतस्य । प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्याम् एतेनैव पिण्डो व्याख्यात अत ऊर्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यात् ॥ ५ ॥

आभ्युदयिके प्रदक्षिणार्थमुपचारः पूर्वाह्णे पित्र्यमन्त्रवर्ज्यं जप ऋजवो दर्भा यवैस्तिलार्थाः सम्पन्नमिति तृप्तिप्रश्नः सुसम्पन्नमितीतरे ब्रूयुर्दधिबदराक्षतमिश्राः पिण्डा नान्दीमुखान्पितॄनावाहयिष्य इति पृच्छत्यावाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखान्पितॄन्वाचयिष्य इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपि

तामहाः मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च प्रीयन्तामिति न स्वधां प्रयुञ्जीत युग्मानाशयेदत्र ॥ ६ ॥

अथ तृप्तिर्ग्राम्याभिरोषधीभिर्मासं तृप्तिस्तदभाव आरण्याभिर्मूलफलैरोषधीभिर्वा सहान्नेनोत्तरास्तर्पयन्ति छागोस्रमेषानालभ्य क्रीत्वा लब्ध्वा वा न स्वयं मृतानाहृत्य पचेन्मासद्वयं तु मत्स्यैर्मासत्रयं तु हारिणेन चतुर और्भ्रेण पञ्च शाकुनेन षट् छागेन सप्त कौर्मेणाष्टौ वाराहेण नव मेषमांसेन दश माहिषेणैकादश पार्षतेन संवत्सरं तु गव्येन पयसापायसेन वा वार्ध्रीणसमांसेन द्वादशवर्षाणि ॥ ७ ॥

अथाक्षय्यतृप्तिः खड्गमांसं कालशाकं लोहच्छागमांसं महाशल्को वर्षासु मघाश्राद्धं हस्तिच्छायायां च मन्त्राध्यायिनः पूताः शाखाध्यायी षडङ्गविज्ज्येष्ठसामगो गायत्रीसारमात्रोऽपि पञ्चाग्निः स्नातकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णी द्रोणपाठको ब्राह्मोढापुत्रश्चेति पङ्क्तिपावनो वागीश्वरो याज्ञिकश्च नियोज्या अभावेऽप्येकं वेदविदं पङ्क्तिमूर्द्धनि नियुञ्ज्यादासहस्रात्पङ्क्तिं पुनातीति वचनात् ॥ ८ ॥

अथ काम्यानि भवन्ति स्त्रियोऽप्रतिरूपाः प्रतिपदि द्वितीयायां स्त्रीजन्म श्वास्तृतीयायां चतुर्थ्यां क्षु-

द्रपशवः पुत्राः पञ्चम्याᳵ द्यूतर्द्धिः षष्ठ्यां कृषिः सप्तम्यां वाणिज्यमष्टम्यामेकशफं नवम्यां दशम्यां गावः परिचारका एकादश्यां धनधान्यᳲ हिरण्यं तु द्वादश्यां कुप्यं ज्ञातिश्रैष्ठ्यं च त्रयोदश्यां युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्दश्याममावास्यायाᳵ सर्वमित्यमावास्यायाᳲ सर्व्वमिति ॥ ९ ॥

इति कात्यायनोक्तः नवकण्डिकासूत्रः श्राद्धकल्पः समाप्तः ॥

अथ परिशिष्टशौचसूत्रम् ।

अथातः शौचविधिं व्याख्यास्यामो दूरङ्गत्वा दूरतरङ्गत्वा यज्ञोपवीतं शिरसि दक्षिणकर्णे वा धृत्वा तृणमन्तर्धानङ्कृत्वोपविश्याहनीत्युत्तरतो, निशायान्दक्षिणत, उभयोः सन्ध्ययोरुदङ्मुखो नाग्नौ न गोसमीपे नाप्सु, नागे वृक्षमूले चतुष्पथे गवाङ्गोष्ठे देवब्राह्मणसन्निधौ, दहनभूमिं भस्माच्छन्नं देशं फालकृष्टभुमिञ्च वर्जयित्वा मूत्रपुरीषे कुर्यात् । ततः शिश्नं गृहीत्वोत्थायाद्भिः शौचं गन्धलेपहरं विदध्यात् लिङ्गे देया सकृन्मृद्धै त्रिवारं गुदे दशधा वामपाणावुभयोः सप्तवारं मृत्तिकां दद्यात् । करयोः पादयोः सकृत्सकृदेव मृत्तिका देयेति शौचङ्गृहस्थानां, द्विगुणं ब्रह्मचारिणां, त्रिगुणं वनस्थानां, चतुर्गुणं यतीनामिति ॥ यद्दिवा विहितं शौचं तदर्धं निशायाम्भवति मार्गे चेत्तदर्धमार्त्तश्चेद्यथाशक्ति कुर्यात् ॥ १ ॥

प्रक्षालितपाणिपादः शुचौ देश उपविश्य नित्यं बद्धशिखी यज्ञोपवीती प्रागुदङ्मुखो वा भूत्वा जान्वोर्मध्ये करौ कृत्वाऽशूद्रानीतोदकैर्द्विजातयो यथाक्रमं हृत्कण्ठतालुगराचामन्ति । न तद्भिन्नोष्ठेन न विरलाङ्गुलिभिर्न तिष्ठन्नैव हसन्नापि फेनबुद्बुदयुतम् । ब्रह्मतीर्थेन त्रिः पिबेद द्विः परिमृजेत् । ब्राह्मणस्य दक्षिणहस्ते पञ्च

तीर्थानि भवन्ति अङ्गुष्ठमूले ब्रह्मतीर्थं कनिष्ठिकाङ्गुलि-
मूले प्रजापतितीर्थं तर्जन्यङ्गुष्ठमध्यमूले पितृतीर्थमङ्गु-
ल्यग्रे देवतीर्थं मध्येऽग्नितीर्थमित्येतानि तीर्थानि भवन्ति॥२॥

प्रथमं यत्पिबति तेन ऋग्वेदं प्रीणाति, द्वि-
तीयं यत्पिबति तेन यजुर्वेदं प्रीणाति, तृतीयं
यत्पिबति तेन सामवेदं प्रीणाति, चतुर्थं यदि पिबत्ते-
नाथर्ववेदेतिहासपुराणानि प्रीणाति, यदङ्गुलिभ्यः स्रवति
तेन नागयक्षकुबेराः सर्वे वेदाः प्रीणन्ति, यत्पादाभ्युक्षणं
पितरस्तेन प्रीणन्ति, यन्मुखमुपस्पृशत्यग्निस्तेन प्रीणाति,
यन्नासिके उपस्पृशति वायुस्तेन प्रीणाति, यत् चक्षुरुपस्पृ-
शति सूर्यस्तेन प्रीणाति, यच्छ्रोत्रमुपस्पृशति दिशस्तेन प्री-
णन्ति, यन्नाभिमुपस्पृशति ब्रह्मा तेन प्रीणाति, यद्धृदयमु-
पस्पृशति, तेन परमात्मा प्रीणाति, यच्छिर उपस्पृशति
रुद्रस्तेन प्रीणाति, यद्बाहू उपस्पृशति विष्णुस्तेन प्रीणाति,
मध्यमानामिकया मुखं तर्जन्यङ्गुष्ठेन नासिकां मध्यमा-
ङ्गुष्ठेन चक्षुषो अनामिकाङ्गुष्ठेन श्रोत्रं कनिष्ठिकाङ्गु-
ष्ठेन नाभिं हस्तेन हृदयं सर्वाङ्गुलिभिः शिर इत्यसौ
सर्वदेवमयो ब्राह्मणो देहिनामित्याह इत्येवं शौचविधिं
कृत्वा ब्रह्मलोके महीयते ब्रह्मलोके महीयते इत्याह
भगवान् कात्यायनः ॥

अथ स्नानसूत्रम् ।

अथातो नित्यस्नानं नद्यादौ मृद्गोमयकुशातिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्योरुर्ठंहीति तोयमामन्त्र्यावर्तयेद्येतेशतमिति, सुमित्रियान, इत्यपोऽञ्जलिनाऽऽदाय दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्कटिं बस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति, सुर्याभिमुखो निमज्जेदापोअस्मानिति स्नात्वोदिदाभ्य इत्युन्मज्ज्य निमज्ज्योन्मज्ज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति, ततोऽभिषिञ्चेदिमम्मे वरुणेति चतसृभिर्माप उदुत्तमं मुञ्चन्त्ववभृथेत्यन्ते चैतन्निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेदापोहिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपोदेवा द्रुपदादिव शन्नोदेवीरपाᳬरसमपोदेवीः पुनन्तुमेति नवभिश्चितपातिर्म्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते चान्तर्जलेऽघमर्षणं त्रिरावर्त्तयेद् द्रुपदादिवाऽऽयङ्गौरिति वा तृचं प्राणायामं वा साशिरसमोमिति वा विष्णोर्वा स्मरणम् ॥ १ ॥

उत्तीर्य धौते वाससी परिधाय मृदोरू करौ प्रक्षाल्याचम्य त्रिरायम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वो-

र्ध्वबाहुः सूर्यमुदीक्षन्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति गाय-
त्र्या च यथाशक्ति विभ्राडित्यनुवाकपुरुषसूक्तशिवसंक-
ल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृ-
त्योपविशेद् दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्त्या-
दावारभ्य वेदम् ॥ २ ॥

ततस्तर्पयेद्ब्रह्माणं पूर्वं विष्णुं रुद्रं प्रजापतिं
देवांश्छन्दाꣳसि वेदानृषीन् पुराणाचार्यान् गन्धर्वा-
नितराचार्यान्त्संवत्सरञ्च सावयवं देवीरप्सरसो दे-
वानुगान्नागान् सागरान्पर्वतान्सरितो मनुष्यान् यक्षा-
न् रक्षाꣳसि पिशाचान्सुपर्णान् भूतानि पशून् वन-
स्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामिति ॐकारपूर्वम् ।
ततो निवीती मनुष्यान्—सनकञ्च सनन्दनं तृतीयञ्च
सनातनम् । कपिलमासुरिञ्चैव वोढुं पञ्चशिखन्तथा ।
ततोऽपसव्यं तिलमिश्रं कव्यवाडनलꣳ सोमं यममर्यमण-
मग्निष्वात्तान् सोमपो बर्हिषदो यमांश्चैके । यमाय धर्म-
राजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्व-
भूतक्षयाय च । औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नम इति एकैक-
स्य तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन् । यावज्जीव-
कृतं पापं तत्क्षणादेव नश्यति, जीवत्पितृकोऽप्येतानन्याँ-

श्वेतर उदीरतामङ्गिरस आयन्तुन उर्जंवहन्ती पितृभ्यो येचेह मधुव्वाता इति तृचञ्चान् प्रसिञ्चेत तृप्यध्वमिति त्रिर्नमोव इत्युक्त्वा मातामहानाञ्चैवं गुरुशिष्यर्त्विग्ज्ञातिबान्धवान्, अतर्पिता देहाद्रुधिरं पिबन्ति वासो निष्पीड्याचम्य ब्राह्मवैष्णवरौद्रसावित्रमैत्रवारुणैस्तल्लिङ्गैरर्चयेदहश्रर्ठं हर्ठं स इत्युपस्थाय प्रदक्षिणीकृत्य दिशश्च देवताश्च नमस्कृत्योपविश्य ब्रह्माग्निपृथिव्योषधिवाग्वाचस्पतिविष्णुमहद्भ्योऽपाम्पतये वरुणाय नम इति सर्वत्र संवर्चसेति मुखं विमृष्टे देवागातविद इति विसर्जयेदेष स्नानविधिरेष स्नानविधिः ॥ ३ ॥

अथ भोजनसूत्रम्।

वन्दे श्रीदक्षिणामूर्त्तिं सच्चिदानन्दविग्रहम् ॥
सर्वार्थानाम्प्रदातारं शिवादेहार्धधारिणम् ॥ १ ॥

अथातः श्रुतिस्मृतीरनुसृत्य भोजनविधिं व्याख्यास्यामः ॥ आचान्तो धृतोत्तरीयवस्त्रो धृतश्रीखण्डगन्धपुण्ड्रो भोजनशालामागत्य गोमयेनोपलिप्य शुचौ देशे विहितपीठाधिष्ठितो नित्यम्प्राङ्मुखो न दक्षिणामुखो न प्रत्यङ्मुखो न विदिङ्मुखः। श्रीकामश्चेत्प्रत्यङ्मुखः, सत्यकामश्चेदुदङ्मुखो, यशस्कामश्चेद्दक्षिणामुखो जीवन्मातृकवर्जं हस्तपादास्येषु पञ्चस्वार्द्रो

नीवारचूर्णैर्गोमृदा भस्मनोदकेन वा मण्डलङ्कुर्यात् । चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य मण्डलाकृति वैश्यस्याभ्युक्षणꣳ शूद्रस्य । यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति । एवम्मण्डलभस्मैतत्सर्वभूतानि रक्षत्विति तत्र भूमौ निहितपात्रेऽन्ने परिविष्टे पितुन्नस्तोषमित्यन्नꣳ स्तुत्वा मानस्तोके नमोवः किरिकेभ्यो नमः शम्भवायेत्यभिमन्त्र्य प्रोक्षयेत्, सत्यन्त्वर्त्तेन परिषिञ्चामीति प्रातर्ऋतन्त्वा सत्येन परिषिञ्चामीति सायम् । तेजोऽसि शुक्रमस्यमृतमसीति यजुषाऽन्नमभिमृश्याग्निरस्मीत्यात्मानमग्निन्ध्यात्वा भूपतये भुवनपतये भूतानाम्पतय इति चित्राय चित्रगुप्ताय सर्वेभ्यो भूतेभ्यो नम इति दिवा प्रणवादिकैः स्वाहानमोन्तैर्मन्त्रैः प्रतिमन्त्रं बलीन् हरेत्, अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ॥ त्वंब्रह्मस्त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमम्पदम् । अमृतोपस्तरणमसि स्वाहेति विष्णुमन्त्रमभिध्यायन्नाचम्यान्नममृतं ध्यायन् मौनी हस्तचापल्यादिरहितो मुखे पञ्च प्राणाहुतीर्जुहोति ॥ २ ॥

प्राणाय स्वाहा ऽपानाय स्वाहा व्यानाय स्वाहा समानाय स्वाहोदानाय स्वाहेति क्रमं याज्ञव-

ल्क्योऽमन्यत, उदानाय स्वाहेति शौनकबौधायनौ, याज्ञवल्क्योदितक्रमो वाजसनेयिनाम् । दन्तैर्नोपस्पृशेत् जिव्हया ग्रसेदङ्गुष्ठप्रदेशिनीमध्यमाभिः प्रथमामङ्गुष्ठमध्यमानामिकाभिर्द्वितीयामङ्गुष्ठानामिकाकनिष्ठिकाभिस्तृतीयां कनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थीꣳसर्वाभिरङ्गुलीभिः साङ्गुष्ठाभिः पञ्चमीम् । अङ्गुष्ठानामिकाग्राह्यान्नेनैता आहूतय इति हारीतव्याख्यातारः । सर्वाभिरेता इति बौधायनः । मौनन्त्यक्त्वा प्राग्द्रवरूपमश्नीयान्मध्ये कठिनमन्ते पुनर्द्रवाशी स्यान्मधुरम्पूर्वं लवणाम्लौ मध्ये कटुतिक्तादिकान् पश्चाद्यथासुखम्भुञ्जीत भुञ्जानो वामहस्तेनान्नन्न स्पृशेन्न पादौ न शिरो न बस्ति न परभोजनꣳ स्पृशेदेवं यथारुचि भुक्त्वा भुक्तशेषमन्नमादाय मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः । तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु इति पितृतीर्थेन दत्वाऽमृतापिधानमसि स्वाहेति हस्तगृहीतानामपामर्धं पीत्वाऽर्धम्भूमौ निक्षिपेत्—रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् । अर्थिनाꣳसर्वभूतानामक्षय्यमुपतिष्ठत्विति, तस्माद्देशादपसृत्य गण्डूषशलाकादिभिस्तर्जनीवर्जमास्यꣳ शोधयेत ॥ २ ॥

न भार्यादर्शनेऽश्नीयान्न भार्यया सह न स-

न्ध्ययोर्न मध्यान्हे नार्धरात्रे नायज्ञोपवीती नार्द्रवासा नैकवासा न शयानो न ताम्रभाजने न भिन्नेन राजत-सौवर्णशङ्खस्फाटिककांस्यभाजनवर्जं न लौहे न मृन्मये न संधिसर्ठंस्थिते न भुवि न पाणौ न सर्वभोजी स्यात् किञ्चिद्भोज्यं परित्यजेदन्यत्र घृतपायसदधिसक्तुपललमधुभ्यः, साध्वाचान्तो दक्षिणपादाङ्गुष्ठे पाणिं निःस्रावयेदङ्गुष्ठमात्रःपुरुषो अङ्गुष्ठञ्च समाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुगिति श्वात्राः पीता इति नाभिमालभेत, अमृता इत्यतः प्रागगस्त्यं वैनतेयञ्च शनिञ्च वडवानलम्॥ आहारपरिणामार्थं स्मरेद्भीमञ्च पञ्चममित्युदरमालभ्य "शर्यातिञ्च सुकन्याञ्च च्यवनं शक्रमश्विनौ। भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न हीयत इति स्मृत्वा मुखशुद्धिं कुर्यान्नमो भगवते वाजसनेयाय याज्ञवल्क्याय नमोभगवते वाजसनेयाय याज्ञवल्क्याय॥ ३॥

इति श्रीकात्यायनोक्तभोजनसूत्रं समाप्तम्।

presented to Swami jee maharaj.
97. Sahib Pt. Maheshwar Razdhan.
by Pt. Lachhman joo Rama.
Brahchari 3rd Bridge Srinagar.